THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY
OU_176558
UNIVERSAL
LIBRARY

OUP—556—13-7-71—4,000.

OSMANIA UNIVERSITY LIBRARY

Call No. 3 5 4 1 1 . 2 1 Accession No. 3 5 3 7

Author G ilE K.

Title

This book should be returned on or before the date last marked below.

# PREFACE

*Kuṭṭanīmatam Kāvyam* by Dāmodara Gupta, edited by Pandit Madhusādan Kaul, Superintendent, Archaeology, Research and Museum, Srinagar, Kashmir.

As early as 18[illegible] Dr. Peterson first drew the attention of the public to a palm-leaf MS. (written in *circa* thirteenth century A.D ) of the *Kuṭṭanīmatam* found in the Śāntinātha temple collection at Cambay. That MS. was incomplete and bore the title Shambhalimatam and in 1887 the poem was published in the Kāvyamālā Series utilizing two other MSS. of the poem procured by Pandit Durga Prashad of Jaipur. All these MSS. were 'incomplete and inaccurate', and thus presented textual problems that baffled the ingenuity of many scholars, Indian as well as European.

In 1897-98 MM. Haraprasad Shastri paid visits to Nepal and brought some rare MSS. which he himself described in his Report on the Search of Sanskrit MSS (1895–1900). In that report he made the following significant observation:

> A MS. of the poem Kuttanīmatam has been acquired, copied in 292 of the Newar era, *i.e.*, 1172 A.D. . . . It is written in Bengali character. The oldest dated MS. in this character known in Europe bears the date of 1198. The present MS. is therefore 26 years older than the oldest MS. in Bengali known. I have reason to think that the MS. is older still, as the date is given in a beautiful Newar hand which runs through four lines after the colophon. So the Bengali character in which the whole MS. is written is of an older date than the four lines of Newar script.

The MSS were valuable on more than one ground It helped in ameliorating substantially the highly defective text printed in the Kāvyamālā Series. It also furnished to students of the paleography of the Bengali script MS. material copied in 1172 A.D. (292 of the Newar era) and was therefore 26 years older than the oldest Bengali MS. known in Europe.

Pandit Shastri and his pupil the late Rakhaldas Banerjee made occasional references to the value of Kuṭṭanīmatam and so we understand how a Kashmirian pupil of Pandit Shastri, who was working with him in Calcutta—Pandit Madhusudan Kaul of Srinagar—was entrusted with the work of editing and annotating the poem. In a letter dated 26th March, 1918, written from the premises of Pandit Shastri (26 Pataldanga Street, Calcutta) Pandit Kaul, then a Research Scholar of the Kashmir Durbar attached to Pandit Haraprasad, wrote as follows:

> I have prepared press copy for a good edition of the *Kuttanīmatam* by one of my countrymen about eleven hundred years ago. It gives a lively picture of the Hindu society of the time at Benares. It was years ago printed in the *Kāvyamālā* Series but the materials on which the edition was based were not only defective but also incorrect. I have

prepared the press copy from two excellent manuscripts in the A.S.B. Library. One is a very beautiful Bengali manuscript, complete and correct, copied some time before 1172 A.D. The other is a Newari copy based presumably on the above.

The question of undertaking the publication of the book was discussed in April 1918 and Pandit Shastri observed: 'I have seen the press copy carefully and I find that the various readings have been very well done. . . . The work will be a great improvement on the old edition.' Objection was raised on the ground that the book was published elsewhere and that it was not in conformity with the 'main object of the Bibliotheca Indica Series, publishing important Oriental works that exist only in MSS ' This technical objection was overruled and on the recommendation of Jt. Philological Secretary, Pandit S. C. Vidyabhusana, and of Prof D R. Bhandarkar, Sir Asutosh Mookerjee urged the inclusion of *Kuṭṭanīmatam* in the list of works approved for publication in the Bibliotheca Indica Pandit Shastri further justified this new edition saying that the Kāvyamālā edition was prepared from 'bad and incomplete materials' while 'nearly a fourth of Madhusudan's work is absolutely new '.

The work was apparently sent to B M Press in 1919 and in February 1920 we find the editor receiving proofs. In June 1921 we note that proofs from pp. 104–120, i e to the last page of the text, and pp. 121–160 of the Notes were sent to the editor. In August 1922 the B.M. Press was complaining that corrected proofs of the Notes were not reaching them.

A mysterious silence followed and after nearly a decade we find Prof. J. J. Meyer appealing to the then Gen. Secretary, Mr. Van Manen, to help him with the reprint or proofs of the work so far composed. We quote below some passages of Prof. Meyer's letter dated Laubenhof, Chur, Switzerland, 19th July, 1931:

> The Librarian of the India Office in London sent me a copy of your kind letter to him dated 25th June, 1931, and concerning my request for a MS. of Damodargupta's Kuttanīmatam.
>
> Some months ago I finally mailed to the publisher the MS. of the work for which I am in need of MS. help. It is a new and thoroughly revised edition of the translation of Kshemendra's Samayamātrikā and Damodargupta's Kuttanīmatam, in one large volume, entitled Mores et Amores Indorum. The Introduction has also been amplified and a long foreword is to be added. The original edition came out in 1903 and has been out of print almost ever since. . . . . I hope that the new edition of the Sanskrit text of the Kuttanīmatam now in preparation for the Bibliotheca Indica will be ready in time so that I can use it for an appendix to my book in which I should like to take up *at least* the more important passages and points that will receive new light from your edition of the text.
>
> The text in the Kāvyamālā, as you well know, bristles with *cruces interpretum*, especially from stanza 486 on. . . . Now when do you expect your edition to be completed? Could you mail me the advance sheets as soon as printed? Or, if need be, a copy of the proof sheets as soon as they are advanced, *i.e.*, expurgated far enough to be serviceable?

Meanwhile the MSS. of the A.S.B. were copied out in Devanāgari characters by Babu Govindadas of Benares, who placed his copy to Pandit T. M. Tripathi who published a new edition from Bombay in 1924, adding his own Sanskrit commentary Rasa-Dīpikā. This edition was recommended by Mr Van Manen to Prof Meyer who also got from our Society a file of the formes so far printed. Prof Meyer's letter that followed, dated Sept 13, 1931, will explain itself·

Kindly accept my sincerest thanks for your two letters and the contents of the two registered parcels. Now that I have all the material you can furnish me at the present time before me I shall again attack the Kuttanīmatam, with which I have wrestled anew for many a month some time ago. No doubt the help which you sent me with such benevolent and painstaking alacrity will be so great that many a knot that defied all my racking of the brains can now be undone. A thousand thanks once more.

While Prof Meyer was trying to expedite the publication of the A.S B text, Mr Van Manen probably sought the help of some local pundits to help in completing the book In 1929 Mr Chintaharan Chakrabarti was invited to see the remaining portions of the work through the press Mr. Van Manen apparently lost all touch with Pt. Kaul, who had seen the printing of the text as far as p. 112 and some portions of the Notes as well We also know that notes on verses 1–860 were set up in type and that notes for the remaining portions of the work (verses 862–1058) were prepared by Mr Chakrabarti

These facts were revealed in the Notes submitted by Mr. Chakrabarti to the Society in 1939, after a second lapse of academic memory of another decade (1929–1939) Mr Van Manen retired and the first report of Mr. Chakrabarti was addressed to the Reorganisation Committee just 20 years after the starting of printing

Dr B. S Guha tried his best to bring into a line of co-operation the two learned Sanskritists of Calcutta and Kashmir But alas! it was not an easy affair, and the chequered career of this valuable MS could but partially be redeemed by the present publication of the complete text with variants for the benefit of Sanskrit scholars, in the 25th Jubilee of its first setting up at the B.M. Press (1919) To allow this matter to drag on would mean the utter decomposition of the printed formes and so the Publication Committee decided to release the text portion only as fasc. 1, expecting to publish critical notes, etc. in a future fascicule when Pandit Kaul would send them to us. We apologize to the learned editor for this unfortunate delay and thank him for his patient co-operation with us

There is ample justification for publishing more than one recension of such a rare text as the Kuṭṭanīmatam. In spite of numerous distortions in textual reading and deviations in sense inevitable in MS. traditions of such a restricted range, we may recommend the cantos composed by Dāmodara Gupta,

Minister of King Jayāpiḍa, (779–830 A.D.), as specimens of erotic kāvya of the late classical period of Sanskrit literature. The only other experiment along similar lines was made possibly in the same epoch by some pseudo-Kālidāsa who tried to smuggle a good deal of his knowledge of the Kāmaśāstra into the later (probably apocryphal) cantos of the Kumārasambhava which provoked, as we know, some later writers to compose poetic commentaries on Vātsāyana's Kāmasūtra. That remarkable treatise which, like Kautilya's Arthaśāstra, was gradually getting dismembered, was luckily conserved to a certain extent through the zeal and poetic scale of eminent writers like Kālidāsa, Māgha and Dāmodara Gupta. Havelock Ellis, the celebrated author of the psychology of sex, has paid generous tributes to Vātsāyana as a pioneer of scientific studies along that line.

So Prof. J. J. Meyer and Dr. Schmidt by their laborious researches into Indian erotic literature have demonstrated their scientific worth, and in publishing our Society's text of the Kuṭṭanīmatam we hope that some interest would be roused among scholars studying problems for normal and abnormal psychology. Prof. Keith has very appropriately classified Kuṭṭanīmatam into his group of didactic poetry, saying that there is both wit and humour, despite their coarseness in some of the stanzas.

KALIDAS NAG,
*General Secretary.*

ROYAL ASIATIC SOCIETY OF BENGAL,
*10th July, 1941.*

श्रीगणेशाय नमः ॥

# कुट्टनीमतं काव्यम् ।

स जयति सङ्कल्पभवो रतिमुखशतपत्रचुम्बनभ्रमरः ।
यस्यानुरक्तललनानयनान्तविलो[१]कितं वसतिः ॥ १ ॥

अवधीर्य दोषनिचयं गुणलेशे सन्निवेश्य मतिमार्याः ।
कुट्टन्या मतमेतद्दामोदरगुप्तविरचितं शृणुत ॥ २ ॥

अस्ति खलु निखिलभूतलभूषणभूता विभूतिगुणयुक्ता ।
यु[२]क्ताभियुक्तजनता नगरी वाराणसी नाम ॥ ३ ॥

अनुभवतामपि यस्यामुपभोगान्कामतः शरीरवताम् ।
शशधरखण्डविभूषितदेहलयः किल न दुष्प्रापः ॥ ४ ॥

चन्द्रविभूषितदेहा भूतिरताः सद्भुजंगपरिवाराः ।
वारस्त्रियोपि यस्यां पशुपतितनुतुल्यतां याताः ॥ ५ ॥

अतितुङ्गसुरनिकेतनशिखरसमुत्क्षिप्तपवनचलिताभिः ।
मंजरितमिव विराजति यत्र नभो वैजयन्तीभिः ॥ ६ ॥

अविरतसंचरदबलाचरणतलालक्तकद्रवारुणितम् ।
स्थलकमलवतीलक्ष्मीं बिभर्ति वसुधातलं यत्र ॥ ७ ॥

१ 'विलोकनम्' इति मु० पा० । २ 'मुक्ता' इति मु० पा०

यत्र च रमणीभूषणरवबधिरितसकलदिङ्मभोभागे ।
शि[1]ष्याणां नाचार्यैरवद्यमवधार्यते पठताम् ॥ ८ ॥
दिव्यधराधरभूरिव या राजति मत्तवारणोपेता ।
बकुलनिशीथवतीव प्रोज्ज्वलधिष्ण्योपशोभिता या च ॥ ९ ॥
यतिगणगुणमुपेता या नित्यं छन्दसामिव प्रचितिः ।
वनपंक्तिरिव सशा[2]ला तुरुष्कसेनेव ब[3]हुलगन्धर्वा ॥ १० ॥
तारागणोऽकुलीनः प्रियदोषा यत्र कौशिकाः सततम् ।
गद्ये वृत्तच्यवनं परगृहरोधस्तथाऽक्षेषु ॥ ११ ॥
शूलभृतो व्या[4]लस्थाः पदवेदिषु यत्र धातुवादित्वम् ।
सुरतेष्वबलाक्रमणं दानच्छेदो मदच्युतौ करिणाम् ॥ १२ ॥
तीव्रकरत्वं भानोरविवेको यत्र मित्र[5]हृदयानाम् ।
योगिषु दण्डग्रहणं संधिच्छेदः प्रगृह्येषु ॥ १३ ॥
छन्दःप्रस्तारविधौ गुरवो यस्यामनार्जवस्थितयः ।
वीणायां परिवादो द्विजनिलयेष्वप्रसन्नत्वम् ॥ १४ ॥
अनुरूपवृत्तघटना सत्कविकृतरूपकेषु[6] लोके च ।
रमणीवचने यस्यां माधुर्यं काव्यबन्धे च ॥ १५ ॥
यस्यामुपवनवीथ्यां तमालपत्राणि युवतिवदने च ।
नखरप्रहार[7]रणितं तन्त्रीवाद्येषु[8] सुरतकलहेषु[9] ॥ १६ ॥

---

१ 'शिष्याणामाचार्यैर्नावद्यं वार्यते' इति मु० पा० ।
२ 'ससाला' इति ब० पा० ।
३ 'बहल' इति ब० पा० ।
४ 'ध्यनस्थाः' इति मु० पा० ।
५ 'मित्रसुहृदानाम्' इति मु० पा० ।
६ 'रूपके च' इति मु० पा० ।
७ 'कणितम्' इति ब० पा० ।
८ 'वाद्ये च' इति ब० पा० ।
९ 'कलहे च' इति ब० पा० ।

नन्दनवनाभिरामा विबुधवती नाकवाहिनीजुष्टा ।
अमरावतीव यान्या विश्वसृजा निर्मिता जगति ॥ १७ ॥

तस्यां खगपतितनुरिव बिलासिनी[1] हृदयशोकसंजननी ।
आक्लिष्टेश्वरहृदया प्रालेयनगाधिराजतनयेव ॥ १८ ॥

संसक्तभोगिनेत्रा मन्दरधरणीभृतो यथा मूर्तिः ।
उपरि गता शूलानामन्धासुरगात्रलेखेव ॥ १९ ॥

समुवास वाररामा मानसजन्मनः शरीरिणी शक्तिः ।
निःशेषवेशयोषिद्विभूषणं मालती नाम ॥ २० ॥ (विशेषकम्)

पेशलवचसां वसतिर्लीलानामाक[2]रः स्थितिः प्रेम्णः ।
भूमिः परिहासानामावसथो वक्रकथि[3]तानाम् ॥ २१ ॥

सा शुश्राव कदाचिद्धवलालयपृष्ठदेशमधिरूढा ।
केनापि गीयमानां प्रसङ्गपतितामिमामार्याम् ॥ २२ ॥

'यौवनसौन्दर्यमदं दूरेणापास्य वारवनिताभिः ।
यत्नेन वेदितव्याः कामुकहृदयार्जनोपायाः' ॥ २३ ॥

श्लाघ्य विपुलजघना मनसीं मालती चकार चिरम् ।
अतिसाम्प्रतमुपदिष्टं सुहृदेवानेन साधुना पठता ॥ २४ ॥

तद्गत्वा पृच्छामो विकरालां कलितसकलसंसाराम् ।
यस्याः कामिजनौघो दिवानिशं द्वार[4]मध्यास्ते ॥ २५ ॥

इति मनसि सा निवेश्य द्रुततरमवतीर्य वेश्मनः शिखरात् ।
विकरालाभवनवरं परिजनपरिवारिता प्रययौ ॥ २६ ॥

---

१ 'विलासिनां हृद...' इति मु० पा० । २ 'मालय.' इति मु० पा० ।
३ 'कथितानाम्' इति मु० पा । ४ 'द्वारदेशम्' इति ब० पा० ।

अथ विरलोन्नतदशनां निम्नहनुं स्थूलचिपिटनासाग्राम् ।
उल्बणचूचुकलाञ्छितशुष्ककुचस्थानशिथिलकृत्तितनुम् ॥ २७ ॥
गम्भीरारक्तदृशं निर्भूषणलम्बकर्णपाली च ।
कतिपयपाण्डुरचिकुरां प्रकटशिरासन्ततायतग्रीवाम् ॥ २८ ॥
सितधौतवसनयुगलां विविधौषधिमणिसनाथगलसूत्राम् ।
तन्वीमङ्गुलिमूले तपनीयमयीं च बालिकां दधतीम् ॥ २९ ॥
गणिकागणपरिकरितां कामिजनोपायनप्रसक्तदृशम् ।
आसन्द्यामासीनां विलोकयामास विकरालाम् ॥ ३० ॥ (कुलकम्)
अ[1]वलोक्य सा विधाय क्षितिमण्डललीनमौलिना प्रणतिम्
परिपृष्टकुशलवार्ता समनुज्ञातासनं भेजे ॥ ३१ ॥
अथ विरचितहस्तपुटा सप्रश्रयमासनं समुत्सृज्य ।
इदमूचे विकरालामवसरमासाद्य मालती वचनम् ॥ ३२ ॥
विदधासि हरिमकौस्तुभमहरिं हरि[2]मगजनाथममरेन्द्रम् ।
अद्रविणं द्रविणपतिं नियत मतिगोचरे पतितम् ॥ ३३ ॥
अयमेव बुद्धिविभवं हतविभवस्ते पटच्चरावरणः ।
कामुकलोकः कथयति सत्रागारेषु भुंजानः ॥ ३४ ॥
उपसद्धृतान्यकर्मा धनवर्मा नर्मदांघ्रियुगलस्य ।
सकलसमर्पितसंपद्यदुपेतः पादपीठत्वम् ॥ ३५ ॥
यदुपगतो नयदत्तः सागरदत्तस्य मध्यमः पुत्रः ।
प्रीणा[3]ति मदनसेनां विधाय पितृमन्दिरं रिक्तम् ॥ ३६ ॥

१ 'अथ सा विधाय दूरात्' इति मु० पा० । २ 'रविम्' इति ब० पा० ।
३ 'प्रीणयति' इति ब० पा० ।

यन्मौलार्पितचरणौ मंजर्या भट्टपुत्त्रनरसिंहः ।
परितोषं व्रजति परं मृदु मृदुन्पाणियुगलेन ॥ ३७ ॥
यन्निःशेषितविभवो दीक्षितभवदेवपुत्त्रशुभदेवः ।
निर्भर्त्सितोऽपि नोज्झति केशग्रहसनाथद्वारम् ॥ ३८ ॥
अन्या अपि कामिजनसाधारणयोषितो यदाक्रम्य ।
विदधति कर्पटशेष विलम्बितमेतत्त्वोपदेशानाम् ॥ ३९ ॥

( कुलकम्[1] )

हीनान्वयजन्मानो गुणहीना रोगिणो निराकृतयः ।
उपसेविता मयापि प्रकटीकृतरागसौष्ठवं पुरुषाः ॥ ४० ॥
मातः किं विदधामो हतधातृर्वामताभियोगेन ।
नासादयाम इष्टं[2] निजतनुपण्यप्रसारकेणापि ॥ ४१ ॥
तत्कुरु मातरनुग्रहमभिधत्स्व ममापि देहिनो भोग्यान् ।
तेषां च वेशवेष्टितमनसिजशरजालपातनोपायान् ॥ ४२ ॥
इति गिरमुदीरयन्तीं सप्रेमामृश्य पाणिना पृष्ठे ।
रुचिरवचो विकराला रुचिराकृतिमालतीमूचे ॥ ४३ ॥

( कुलकम्[3] )

अयमेव दह्यमानस्मरनिर्गतधूमवर्तिकाकारः ।
चिकुरभरस्तव सुन्दरि कामिजनं किंकरीकुरुते ॥ ४४ ॥
अयमेव ते कृशोदरि मन्दोल्लसितभ्रुविभ्रमाधारः ।
अधरीकरोति धीरान्मधुरस्मितसुभगवीचितविशेषः ॥ ४५ ॥

१ व० पुस्तके न दृश्यते ।
२ 'दृश्यम्' इति मु० पा० ।
३ 'कलापकम्' इति व० पा० ।

इयमेव दशन[1]कांती रतिकान्ताकूतमतितरां कुरुते ।
श्रुतिपथमप्युपयाता नियतं तव कामिनां मनसि ॥ ४६ ॥
इयमेव दशनपङ्क्ती रुचिराचिरकान्तिधा[2]ममकांतिः ।
उत्पादयति नितान्तं तव मन्मथदाहवेदनां पुंसाम् ॥ ४७ ॥
इदमेव समुल्लपितं लीलावति विजितपरभृतध्व[3]नितम् ।
तव निःशेषभुजंगव्याकर्षणसिद्धमंत्र[4] उच्चरितः ॥ ४८ ॥
इदमेव मकरकेतननिकेतनं स्तनयुगं तवाभोगि ।
भोगवति भोगसाधनमपरोपायग्रहो व्यर्थः ॥ ४९ ॥
इदमेव बाहुयुगलं मृणालतनुसुन्दरं तवाभोगि ।
कस्य न जनयति मदन कनकाङ्गदभूषणं सुतनु ॥ ५० ॥
अयमेव मध्यदेशः कन्दर्पादेशकरणचतुरस्ते ।
प्रकृशोऽपि शरीरवतो दशमीं प्रापयति मन्मथावस्थाम् ॥ ५१ ॥
इयमेव रोमराजिः संकल्पजचापयष्टिगुणशोभाम् ।
दधती विदधाति तव स्मरसायकशल्यविक्लवान्यूनः ॥ ५२ ॥
इदमेव च[5] पृथुजघनं कलधौतशिलातलाभिरमणीयम् ।
तव तरुणि वशीकरणं यतिसंयतिनाशकारि करभोरु ॥ ५३ ॥
इदमेव तवोरुयुगं रम्भास्त[6]म्भोपमं मनोहारि ।
वद सुन्दरि नाभिमतं मदनज्वर[7]शान्तये कस्य ॥ ५४ ॥

१ 'वदनकान्ती' इति ब० पा० । २ 'कांतिसमकांतिः' इति ब० पा० ।
३ 'ध्वानम्' इति ब० पा० । ४ 'मंत्रवच्चरितम्' इति ब० पा० ।
५ 'पृथुलजघनम्' इति ब० पा० । ६ 'गर्भो' इति ब० पा० ।
७ 'तापशान्तये' इति ब० पा० ।

यौवनकल्पतरोर्मे कनकलताविभ्रमं सुवृत्तमिदम् ।
जंघायुगलं नेच्छति कामफलप्राप्तये क इह ॥ ५५ ॥
निर्जितदाड़िमरागं विजितस्थलकमलिनीविलासमिदम् ।
तव च[1]रणसरोजयुगं कस्य न मानसमलंकुरुते ॥ ५६ ॥
ह्रेपयति वारणेन्द्रं हंसं हसति प्रयातमिदमेव ।
तव लीलावति ललितं यूनां हृदयानि मथ्नाति ॥ ५७ ॥
तदपि यदि ते कुतूहलमवधानं सविधाय तनुमध्ये ।
आकर्णय कथयामि स्वबुद्धिविभवानुसारेण ॥ ५८ ॥
स्वीकुरु तावत्प्रथमं नृपसेवकभट्टसूनुमतियत्नात् ।
स्वाधीनामतिविपुलां यदि सम्पदमीहसे सुतनु ॥ ५९ ॥
प्रत्यासन्नग्रामे स्वयं प्रभुः पितरि नित्यकटकस्थे ।
भट्टसुतश्चिन्तामणिराकृष्टो भवति नियमेन ॥ ६० ॥
शृणु तस्य चारुहासिनि वेषग्रहणं च चेष्टितं चैव ।
निपतति स[2] यथा तूर्णं प्रियसुरभिकुसुमश[3]रासनभ्रमरे ॥ ६१ ॥
स्थूलस्यापितचू[4]लकपंचांगुलमात्रकेशविन्यासः ।
लम्बश्रवणनिवेशितकरपत्रकघटितदन्तपंक्तिश्च ॥ ६२ ॥
करशाखा[5]र्पितमुद्रिकचामीकरकण्ठसूचिकाभरणः ।
परिमृष्टगात्रकुंकुमकिंचित्पिंजरित[6]सर्वाङ्गः ॥ ६३ ॥

१ 'तरुणि चरणयुगलम्' इति मु० पा० । २ 'तथा च' इति मु० पा० ।
३ 'सुरभिशरा...' इति मु० पा० । ४ 'चूडः पचा...' इति मु० पा० ।
५ 'श्रित' इति ब० पा० । ६ 'वसनसवीतः' इति ब० पा० ।

प्रविलम्बिकुसुमदामकगलमण्डनजातरूपकृ[1]तशोभः ।
अन्तर्निविष्टसिक्[2]थकतौरुष्किकखुम्भिकादिचरणश्च ॥ ६४ ॥

नानावर्णविवेष्टितबहलदशापाशबद्धततकेशः ।
एकस्मिन्दलवीटकमपरस्मिन्सीसपत्रकं कर्णे ॥ ६५ ॥

उच्चण्डकनकगर्भितकुङ्कुमपिंजरितवस्ति[3]परिधानः ।
स्थूलतरकाच[4]वर्तकमालां च गले दधानेन ॥ ६६ ॥

वृश्चिकरंजितकररुहकरमूलनिबद्धशंखचक्रेण ।
प्रथमवयस्क भजता ताम्बूलकरंकवाहिनानुगतः ॥ ६७ ॥

(विशेषकम्[5])

श्रेष्ठिवणिग्विटकितवप्रधानरङ्गस्य सुमहतो मध्ये ।
शूलापालस्थापितकतिपयवर्[6]ध्रोरुपीठिकासीनः ॥ ६८ ॥

उत्संगार्पितखड्गैर्यथातथभाषिभिर्मदौद्ध[7]त्यम् ।
बिभ्राणैरनुजीविभिरधिष्ठितः पञ्चषैः पुरुषैः ॥ ६९ ॥

चतुरतरसेवकार्पितपृष्ठपरिक्षिप्तप्रर्वदेहांशः ।
[8]अन्तर्धृतताम्बूलस्थोच्छूनकपोलकलितकरपर्णः ॥ ७० ॥

अनपेक्षितप्रसङ्गः पुनः पुनः पठति मोन्नतभ्रूकः ।
गाथां श्लोकप्रायां भावितचेता यथातथाधीताम् ॥ ७१ ॥

१ 'करशोभ' इति ब० पा० । २ 'सिक्थिततौरुष्कक' इति ब० पा० ।
३ 'वसन' इति मु० प० । ४ 'चर्चक' इति मु० पा० ।
५ 'कुलकम्' इति मुद्रितपुस्तकेऽस्ति । ६ 'बद्धो' इति मु० पा० ।
७ 'मद्दौद्धत्यम्' इति ब० पा० । ८ 'अंतर्विधृतावेल्लप्रोत्सून' इति ब० पा० ।

विस्मयलोलितमौलिः पार्श्वगतांस्ताडयन्समावेगात् ।
हा[1] कष्टं साध्विति वादैरन्तरयति परसुभाषितश्रवणम् ॥१२॥

इदमुक्तो रहसि रुषा तातेन नृपो नृपेण तातोऽपि ।
इति पितुराविष्कुरुते महीभृ[2]तः प्रणयविश्वासौ ॥ १३ ॥

पत्त्रच्छेदमजानञ्जानन्वा कौशलं कलाविषये ।
प्रकटयति जनसमाजे विभ्राणः पत्त्रकर्तरीं सततम् ॥ १४ ॥

ब्रह्मोक्तनाट्यशास्त्रे गीते मुरजादिवादने चैव ।
अभिभवति नारदादीन्प्रावीण्ये भट्टपुत्रस्य ॥ १५ ॥

वसुनन्दचित्रदण्डकमु[3]क्तायुधखड्गधेनुबन्धेषु ।
व्र[4]जति पुरतोऽस्य नित्यं भार्गवतां परशुरामोऽपि ॥ १६ ॥

वात्स्यायनमयमबुधं बा[5]ह्यं दूरेण दत्तकाचा[6]र्यम् ।
गणयति मन्मथतन्त्रे पशुतुल्यं राजपुत्रं स ॥ १७[7] ॥

प्रपलायनैकहृदये यो विक्रममातनोति हरिणेऽपि ।
सिंहस्य तस्य शौर्यं त्रपाकर[8] भट्टपुत्रस्य ॥ १८ ॥

आखेटकेऽपि कौतुकमस्यैव जयस्य चचले लक्ष्ये ।
[9]भट्टभयेन न खेलति भट्टसुतः किंत्वतिप्रकटम् ॥ १९ ॥

१ 'हा कष्टसाधुवादैः' इति ब० पा० ।
२ 'भृताम्' इति ब० पा० ।
३ 'मुग्धा' इति मु० पा० ।
४ 'त्यजति' इति मु० पा० ।
५ 'बाह्यान्' इति मु० पा० ।
६ 'चार्यान्' इति मु० पा० ।
७ 'इष्टपुस्तकद्वये 'यः प्रार्थितोऽपि यत्नात्कवचं राधासुतो ददाति स्म । अविचिन्तितवस्तुवर्षैस्त्यागगुणं हसति तस्यायम्' इत्येतत्पद्यमधिकमस्ति ।
८ 'त्रपाकरं भवति भट्टपुत्रस्य' इति मु० पा० ।
९ 'भट्टतनयेन' इति मु० पा० ।

इति निजसेवकनिगदितरमणीयवचःश्रवणपरितुष्टा[1] ।
अन्तर्मुदितो[2] ब्रूते मामेष[3] खलीकरोतीति ॥ ८० ॥

( सदानि[4]तकम् )

कतमत्कतमल्लग्नं प्रस्थान[5] का च नर्तकी भद्रा[6] ।
विट[7]खटके का नृत्यति कोहलभरतोदितक्रियया ॥ ८१ ॥

कीदृक्[8] लयमार्गे धेनुकरचिते च भा[9]णके कीदृक् ।
प्रेक्षणकादावेवं पृच्छति नृत्योपदेशक यत्नात् ॥ ८२ ॥

सुमनोमालां कण्ठात्सादरचेता ददाति नर्तक्यै ।
अपनीय स[10] ताम्बूलकमनवसरे माधुवादं च ॥ ८३ ॥

भुजपतनगा[11]त्रसंस्थितिलालित्योद्वहनपार्श्ववलितानि ।
अनयैव निर्मितानि स्थानकशुद्धिश्च चातुरस्र्यं च ॥ ८४ ॥

प्रविभक्तैर्भावरसैरभिनयभङ्[12]या परिक्रमैश्चित्रैः ।
रम्भामप्यतिशेते किमुतेतरनर्तकीलोकम् ॥ ८५ ॥

इत्यपसारकविरताव[13]विरतमुल्ल[14]युकण्ठमत्युच्चैः ।
वर्णयति भावितात्मा लक्षितपदमात्रया पात्र[15]म् ॥ ८६ ॥

१ 'तुष्टा' इति मु० पा० ।　　२ 'मुदिता' इति मु० पा० ।
३ 'मामेष' इति मु० पा० ।　　४ महद्गोचरीभूतपुस्तकयुगले यत्र धात्र एतस्य स्थाने 'सम्मानितकम्' इत्यस्ति ।　　५ 'ने' इति मु० पा०
६ 'भर्ता' इति मु० पा० ।　　७ 'षिङ्गटके' इति ब० पा० ।
८ कीदृक्षो नयमार्गे' इति मु० पा० ।　　९ 'तानके' इति मु० पा० ।
१० 'सताम्बूलाम्' इति मु० पा० ।　　११ 'मात्र' इति मु० पा० ।
१२ 'भक्त्या' इति मु० पा० ।　　१३ 'द' इति मु० पा० ।
१४ 'मुच्छ्लित' इति मु० पा० ।　　१५ 'पातम्' इति मु० पा० ।

प्रायेण भट्टतनयो भवतीदृशवेषचेष्टितो भद्रे ।
तं मदनवागुरान्तः पातयसि यथा तथा ब्रूमः ॥८७॥ (कुलकम्[1])

चतुरा प्रागल्भ्यवती परचित्तज्ञानकौशलोपेता ।
योज्या तस्मिन्दूती वक्रोक्तिविभूषिता प्रयत्नेन ॥ ८८ ॥

समुपेत्य तयाऽवसरे ताम्बूलं सुमनसश्च दत्त्वेत्थम् ।
अभिधातव्यः सुन्दरि मकरध्वजदीपकैर्वचनैः ॥ ८९ ॥

जन्मसहस्रोपचितैः पुण्यचयैरद्य फलितमस्माकम् ।
यत्त्वं[2] नयनानन्दन नयनाऽवसरं समेतोऽसि ॥९०॥

चाटुक्रममनुरागं प्रणयरुषौ विरहजनितशोकाग्निम् ।
प्रकटयति वाररमणी नटीव शिक्षाभियोगेन ।९१॥

प्रवयसि यौवनशालिनि हीनकुले सत्कुलप्रसूते च ।
रोगवति दृढशरीरे समचित्ता योगिनश्च गणिकाश्च ॥९२॥

उपचरिताप्यतिमात्रं पण्यवधूः क्षीणसम्पदं[3] पुंसः ।
पातयति दृशं व्रजतः स्पृहया परिधानमात्रेऽपि ॥९३॥

इत्थं दृढतरवासितमनसां पुंसां[4] समाम्रतं पुरतः ।
वेशविलासवतीनामशरीरशरव्यथाकथनम् ॥९४॥ (कुलकम्[4])

केवलमगणितलाघवदूरपरित्यक्तधीरताभरणा ।
मुखरयति मां दुराशादग्धमखौ[5] तेन कथयामि ॥९५॥

१ मुद्रितपुस्तके नास्ति । २ 'यस्त्वम्' इति मु० पा० ।
३ 'न्त' इति ब० पा० । ४ इहपुस्तकद्वये 'कुलकम्' इति नास्ति ।
५ 'वतौ' इति मु० पा० ।

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ लोचनविषयं त्वया भजता ॥ ९६ ॥

क्षणमुत्कण्टकिताङ्गी क्षणमुल्वणदाहवेदनाय[१]त्ता ।
क्षणमुपजातो[३]त्कम्पा स्वेदार्द्रवपुः क्षण भवति ॥ ९७ ॥

मुहुरविभावितका[२]र्य्या मुहुरुज्झितधीरभावमत्युच्चैः ।
रोदिति गायति च[४] पुनः पुनश्च मौनावलम्बिनी भवति ॥ ९८ ॥

पतति मुहुः पर्य्यङ्के मुहुरङ्के परिजनस्य मुहुरवनौ ।
किसलयकल्पिततल्पे मुहुरश्मनि मुहुरनङ्गसतप्ता ॥ ९९ ॥

महिषीव पङ्कदिग्धा हंसीव मृणालवलयपरिवारा ।
सुभगमयूरीवासौ भुजंगविद्वेषिणी जाता ॥ १०० ॥

कदलीच[५]म्पकचन्दनपंकेरुहनीरहारघनसारम् ।
सु[६]न्दरशशधरकान्तं नो शान्त्यै मदनहुतभुजस्तस्याः ॥ १०१ ॥

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥ १०२ ॥

संकल्पैरुपनीतं त्वामन्तिकमुक्तमन्मनोवृत्तिः ।
दृढमालिंगति पश्चात्स्वभुजापीडेन याति वैलक्ष्यम् ॥ १०३ ॥

कुसुमामोदी पवनः पिककूजितभृङ्गसार्थरमितानि ।
इयमियती सामग्री घटिता का[७]मेन तद्विनाशाय ॥ १०४ ॥

१ 'वस्था' इति ब० पा० ।　　२ 'तार्कं' इति ब० पा० ।
३ 'हास्या' इति ब० पा० ।　　४ 'हृष्यति मुह्यति च लम्बिनी' इति मु० पा०
५ 'चन्दनपकः पकरुहं नीरहारघनसारम्' इति ब० पा० ।
६ 'शशशशधरकांतम्' इति ब० पा० ।　　७ 'विधिनैव' इति मु० पा० ।

अबलां बलिना नीतां दशामिमां मकरकेतुना रक्ष ।
आप[1]त्पतितोद्धृतये भवति हि शुभजन्मनां जन्म ॥ १०५ ॥
नो गच्छन्ति यथार्थां[2] अर्थिजनैर्निगदिता गिरः प्रायः ।
मालत्या गुणलेशं शृणु धृष्टतया तथापि कथयामि ॥ १०६ ॥
आस्फालयतो नूनं धनुरतनोः कौसुमं रजः पतितम् ।
संगृह्य[3] सा सुगात्री विश्वसृजा निर्मिता तेन ॥ १०७ ॥
उपहसति गिरिसुताया लावण्यं येन सततलग्नेन ।
न द्रवतामुपनीतं भोगीन्द्रविभूषणस्य देहार्धम् ॥ १०८ ॥
शशधरबिम्बार्धगतां छायामिव भङ्गिकेयवदनस्य ।
अलिपटलनीलकुटिलामलकावलिमलिकसंनिधौ वहति ॥ १०९ ॥
सरसिजमस्थिरशोभं विभ्रमरहितं च मण्डलं शशिनः ।
केन समेतु समत्वं हृदयप्रिय मालतीवदनम् ॥ ११० ॥
अलिरुपरि तदीक्षणयोर्भ्रान्त्या सौगन्ध्यसूचितविशेषः ।
निपतति कर्णाम्बुरुहे निर्गुणताप्यवसरे साध्वी ॥ १११ ॥
बिभ्राणेऽरुणिमाणं सहजं जितबन्धुजीवरुचिमधरे ।
यदलक्तकविन्य[4]सनं तत्तस्या मण्डनक्रीडा ॥ ११२ ॥
चित्रमिदं यदि कृशता तस्या बलिपरिगृहीतमध्यस्य ।
अथवा नो विधिविहिता सहताप्यपनीयते तनुता ॥ ११३ ॥
आस्तामपरस्तावत्तस्याः स्मरवसतिपृथुतरनितम्बः ।

१ 'आपद्यबलोद्धृतये' इति मु० पा० । २ 'यथार्थानर्थि...' इति मु० पा० ।
३ 'संहृत्य सा सुमध्या' इति ब० पा० । ४ 'न्यासस्' इति ब० पा ।

श्लथयति कपिलमुनेरपि दृक्पथपतितः समाधानम् ॥ ११४ ॥
तस्या रम्भावपुषो रम्भोपममूरुयुगलमवलोक्य ।
मकरध्वजोऽपि सहसा निजसायकलक्ष्यतां याति ॥ ११५ ॥
जघनभरालसयाता नायाता सा विलोचन[1]प्रसरम् ।
तिष्ठति तेन मनोहर शरजन्मा ब्रह्मचर्येण ॥ ११६ ॥
यदि कथमपि मधुमथनः पश्यति तामसमबाणसर्वस्वम् ।
तद्सारभार[2]भूतामिव लक्ष्मीमुरसि विनिहितां मनुते ॥ ११७ ॥
यदि पतति सा कथंचिद्वीक्षणविषये हरस्य तदवश्यम् ।
त्रिभुवनमशिवं कुरुते वामेतरदेहभागमासाद्य ॥ ११८ ॥
सौन्दर्यं तत्तादृशमशेषयोषिद्विलक्षणं सृजतः ।
यन्निष्पन्नं धातुस्तन्मन्ये काकतालीयम् ॥ ११९ ॥
सहजविलासनिवासं तस्या वपुरनभिवीक्षमाणस्य ।
मन्ये नाकाधिपतेः सहस्रमपि चक्षुषां विफलम् ॥ १२० ॥
शिथिलयतु कुसुमचापं क्षिपतु शरान्बाणधौ मनोजन्मा ।
संसारसारभूता विचरति भुवि मालती यावत् ॥ १२१ ॥
वात्स्यायनमदनोदयदत्तकविटवृ[3]त्तराजपुत्राद्यैः ।
उच्छ्रसि[4]तं यत्किंचित्तत्तस्या हृदयदेशमध्यास्ते ॥ १२२ ॥
भरतविशाखिलदंतिलवृक्षायुर्वेदचित्रसूत्रेषु ।
पत्रच्छेदविधाने भ्रमकर्मणि पुस्तसूदशास्त्रेषु ॥ १२३ ॥
आतोद्यवादनविधौ नृत्ते गीते च कौशलं तस्याः ।

१ 'नाव' इति मु° पा° ।
२ 'भूतं लक्ष्मीवपुष' इति ब° पा° ।
३ 'पुत्र' इति मु° पा° ।
४ 'उन्नपितम्' इति मु° पा° ।

अभिधातुं यदि शक्तो वदनसहस्रेण भोगिनामीशः ॥ १२४ ॥

( युगल[1]कम् )

परिगलदालोलांशुकमपयंत्रणमु[2]रसि मालती रभसात् ।
निपतति नाऽपुण्यवतां रतिलालससानसा रहसि ॥ १२५ ॥

रतिरसरभसास्फालनचलवलयनिनादमिश्रितं तस्याः ।
तत्कालोचित[3]मणितं श्रुतिपथमुपयाति नाऽन्यपुण्य[4]स्य ॥ १२६ ॥

इत्थमभिधीयमानः शुभमध्ये यदि भवेदुदासीनः ।
एवं ततोऽभिधेयः संदर्शितकोपया दूत्या ॥ १२७ ॥

किं सौभाग्यमदोऽय यौवन[5]लीलाभिरूपतादर्पः ।
सहजप्रेमोपनतां मालतिकां न बहु मन्यसे येन ॥ १२८ ॥

न गणयति या कुलीनान्द्रविणवतः शास्त्रवेदिनः प्रणतान् ।
सा भवदर्थे शुष्यति कुस्थाननिवेशितं धिगनुरागम् ॥ १२९ ॥

कमलवती तीव्ररुचौ बहुभस्मनि शम्भुशिरसि शशिलेखा ।
सा च त्वयि पशुकल्पे यदभिरता तेन से कृशता ॥ १३० ॥

असरलमरसं कठिन दुर्ग्रहमस्निग्धमाश्रिता खदिरम् ।
यद्रूपैति वाच्यपदवीं मालतिका तत्किमाश्चर्यम् ॥ १३१ ॥

अथवा कः खलु दोषो यदतुल्यतयोपजनितवैलक्ष्यः ।
स्वाधीनामपि सरसां परिहरति मृणालिकां ध्वांक्षः ॥ १३२ ॥

मात्र करिष्यसि खेदं निष्ठुरमुक्तोऽसि यन्मया सुभग ।

१ 'कुलकम्' इति मु० पा० ।  २ 'परि' इति ब० पा० ।
३ 'कणितम्' इति ब० पा० ।  ४ 'ण्यवताम्' इति ब० पा० ।
५ 'शीला' इति ब० पा० ।

यूनां हि रक्ततरुणीसुहृदभिहितपरुषमाभरणम् ॥ १३३ ॥
चन्द्रमसेव ज्योत्स्ना कंसासुरवैरिणेव वनमाला ।
कुसुमशरासनलतिका कुसुमाकरवल्लभेनेव ॥ १३४ ॥
मदलीला हस्तिनेव स्तनयुगलेनेव हारलता ।
रम्यापि सा सुगात्री रम्यतरा भवतु संगता भवता ॥ १३५ ॥

(युगल[1]कम्)

किं बहुना यदि यूनामुपरि विधातुं समीहसे चरणम् ।
तत्कुरु रमणीरत्नं प्रेमोज्ज्वलमंक[2]तस्तूर्णम् ॥ १३६ ॥
अथ तद्वचनश्रवणप्रविजृम्भितमदनभट्टदायादः ।
उपचरणीयः सुन्द[3]रि निजवमतिमुपागतस्त्वयाप्येवम् ॥ १३७ ॥
दूरादभ्युत्थान प्रणमनमात्मासनप्रदान च ।
प्रविधेयमंचलेन प्रस्फोटनमंघ्रियुगलस्य ॥ १३८ ॥
ईषदयत्नप्रकटि[4]तकचोदरबाहुमूलकुचयुग[5]लम् ।
संदर्श्य झटिति यास्यसि नायकदृग्गोचरात्तूर्णम् ॥ १३९ ॥
अथ पर्यंकसनाथं दीपोज्ज्वलकुसुमधूपगन्धाढ्यम् ।
विततवितानकरम्यं प्रवेशितो वासकागा[6]रम् ॥ १४० ॥
मात्रा ते गुरुजघने सादरमवतारणादिकं कृत्वा ।
अभिनन्दनीय एभिर्वचनविशेषैः प्रयत्नेन ॥ १४१ ॥

(युग[7]लकम्)

१ मुद्रितपुस्तके नास्ति । २ 'संगतं तूर्णम्' इति मु० पा० ।
३ 'सुस्तनि' इति ब० पा० । ४ 'प्रकटम्' इति ब० पा० ।
५ 'भागम्' इति ब० पा० । ६ 'वासम्' इति ब० पा० ।
७ 'मुद्रितपुस्तके 'कुलकम्' इति पाठान्तरम् ।

अद्याशिषः समृद्धाः परितुष्टा इष्टदेवता अद्य ।
कल्याणालंकारो यदलंकृतवानिदं वेश्म ॥ १४१ ॥
अनुरूपपात्रघटनं कुर्वाणस्याद्य कुसुमबाणस्य ।
सुचिरादृत संजातः शरासनाकर्षणश्रमः सफलः ॥ १४३ ॥
विन्यस्य शिरसि चरणं सुभगा गणिकाजनस्य सकलस्य ।
सौभाग्यवैजयन्तीं संप्रति वत्सा समुत्क्षिपतु ॥ १४४ ॥
दुहितर एव श्ला[1]घ्या धिक् लोकं पुत्रजन्मसंतुष्टम् ।
जामातर आप्यन्ते भवादृशा यदभिसम्बन्धात् ॥ १४५ ॥
दृढपरिचया गुणज्ञा भवद्विधा ना[2]र्थनार्हका यदपि ।
तदपि हृदयाभिनन्दन दुहितृस्नेहादहं वच्मि[3] ॥ १४६ ॥
सहजप्रेमोपनता न्यस्ता त्वयि मालती तथा कार्यम् ।
न यथा भवति वराकी त्वद्विप्रियजन्मनां शुचां वसतिः ॥१४७॥
मृदुधौतधूपिताम्बरमग्राम्यं मण्डनं च बिभ्राणा
परिपीतधूपवर्तिः स्थास्यसि रमणांतिके सुतनु ॥ १४८ ॥
सस्नेहं सव्रीडं ससाध्वसं सस्पृहं च पश्यन्ती ।
किंचिद्दृश्यशरीरा प्रविरलपरिहासपेशलालापा ॥ १४९ ॥
(युग्मम्)

मातरि निर्यातायां परिजनमुक्ते च वासकस्थाने ।
अभियुंजाने रमणे वामाचरणं क्षणं कार्यम् ॥१५०॥

---

१ 'श्रेष्ठा' इति ब० पा० । २ 'मानदा' इति मु० पा० ।
३ 'वच्म्ये' इति मु० पा० ।

रतिसंगरविहितमतावाकर्षति रभसतः पुरस्तस्मिन् ।
कुट्टमितमाचरन्ती जनयिष्यसि किंचिदंगसंकोचम् ॥ १५१ ॥
प्रारब्धे सुरतविधौ क्रमदर्शितचित्तयोनिसंवेगा ।
अपशङ्कमर्पयिष्यसि निर्व्याजं पुंसि गात्राणि ॥ १५२ ॥
यद्य[1]दाच्छति हन्तुं यद्द्रष्टुं यच्च विलिखितुं गात्रम् ।
तत्तदपसारणीयं सावेगं ढौकनीयं च ॥ १५३ ॥
दंशे सव्यथहुंकृतिमामर्दे विविधकण्ठरसि[2]तानि ।
नखविलिखने च सीत्कृतिमाघातेषूल्वणं क्वणितम् ॥ १५४ ॥
ह्रस्वायामश्वासान्मुंचन्ती पुलकदंतुरशरीरा ।
स्विद्यत्सकलावयवा प्रकरिष्यसि रागवृद्धये पुंसाम् ॥ १५५ ॥
(युगलकम्)

परभृतलाव[3]कहंसकपारावततुरगहृदयनिःस्वनितम् ।
अनुकार्यमुचितकाले कलकण्ठि[4] रतेस्त्वया रमतः ॥ १५६ ॥
मा मा मामतिपीडय मुंच क्षणमद्य नो समर्थोऽस्मि ।
इति गद्गदास्फुटाक्षरमभिधातव्यस्त्वया कामी ॥ १५७ ॥
अनुबन्धमानुकूल्यं वामत्वं प्रौढतामसामर्थ्यम् ।
सुरतेषु दर्शयिष्यसि कामुकभावं स्व[5]यं बुद्ध्वा ॥ १५८ ॥
अस[6]मंजसमश्लीलं दूरोज्झितधैर्यमविनयप्रसरम् ।

---

१ 'यावत्' इति मु० पा० । २ 'वलितानि' इति ब० पा० ।
३ 'रामचरस्तक' इति ब० पा० । ४ 'कलकण्ठरतेः' इति ब० पा० ।
५ 'स्फुटम्' इति ब० पा० । ६ 'अपसंजस' इति ब० पा० ।

व्यवहारमाचरिष्यसि वृद्धिमुपेते रसावेगे ॥ १५९ ॥
अविचेतितनखरदनतिरामीलितलोचना निरुत्साहा।
नायककार्यसमाप्तौ स्थास्यसि शिथिलीकृतावयवा ॥ १६० ॥
झगिति नितम्बावरणं निःसहतनुतां स्मितं सवैलक्ष्यम्।
खेदालसां च दृष्टिं जनयिष्यसि मोहनच्छेदे ॥ १६१ ॥
वृत्ते रताभियोगे स्पृष्ट्वा सलिलं विवि[1]क्तभूभागे।
प्रक्षाल्य पाणिपादं स्थित्वा क्षणमासने समू[2]ह्य कचान् ॥ १६२ ॥
उपयुक्तवद[3]नवासा शय्यामारुह्य दर्शितप्रणया।
इति वक्ष्यसि तं रमणं दृढतरमालिंग्य रभसतः कण्ठे ॥ १६३ ॥

(युगलकम्)

भट्टसुत नूनमिष्टा तव जाया यदनुरक्तहृदयस्य।
जनयति परितुष्टिमलं नापररामापरिष्वंगः ॥ १६४ ॥
सफलं तस्या जन्म स्पृहणीया सैव सकलललनानाम्।
गौरी तयैव महिता सुभगंकरणं तपस्तथाचरितम् ॥ १६५ ॥
सैवैका गुणवसतिस्तस्या एवान्वयः सदा श्लाघ्यः।
यस्याः शुभशतभाजः पाणिग्रहणं त्वया विहितम् ॥ १६६ ॥

(युग्म[4]म्)

तिष्ठतु सा पुण्यवती वंशद्वयभूषणं वरारोहा।
या नापयाति भवतो लक्ष्मीरिव नरकवैरिणो हृदयात् ॥ १६७ ॥

---

१ 'विकृष्ट' इति ब० पा०। २ 'सुमार्ज्य' इति ब० पा०।
३ 'रदनवासा' इति मु० पा०। ४ मुद्रितपुस्तके नास्ति।

पातयसि कुवलयनिभे कौतुकमात्रेण लोचने यासु ।
ता अपि सत्यं सुन्दर हर्षोच्छलिता न मान्ति गात्रेषु ॥ १६८ ॥

( संदानितकम् )

तनुरपि नाथप्रणयः प्रायो मुखरीकरोति लघुमनसः ।
स्वार्थनिवेशितचित्ता करोमि तेऽभ्यर्थनां तेन ॥ १६९ ॥

तीव्रस्मरतारुण्याच्चापलतः कौतुकेन घृणया वा ।
मद्भाग्यसम्पदा वा दूत्या वा कौशलात्स्वभावाद्वा ॥ १७० ॥

योऽयं प्रेमलवांशः प्रदर्शितोऽस्मासु जीवनोपायः ।
बाधा नात्र विधेया गणिकाजनवृत्तमन्यथा बुद्ध्वा ॥ १७१ ॥

( युग्मम् )

येन स्नेहः क्रोधः शाठ्यं दाक्षिण्यमार्जवं व्रीडा ।
एतानि सन्ति तास्वपि जीवद्धर्मोपनीतानि ॥ १७२ ॥

निर्व्याजसमुत्पन्नप्रबलप्रेमाभिभूतहृदयानाम् ।
दयितविरहाक्षमाणां गणिकानां तृणसमाः प्राणाः ॥ १७३ ॥

अत्राकर्णय साद्भुतमाख्यानं वर्णयामि यद्वृत्तम् ।
अद्यापि बिभर्ति वटो विशेषणं यदभिसम्बन्धात् ॥ १७४ ॥

'अस्ति महीतलतिलकं सरस्वतीकुलगृहं महानगरम् ।
नाम्ना पाटलिपुत्रं परिभूतपुरंदरस्थानम् ॥ १७५ ॥

त्रिभुवनपुरनिष्पादनकौशलमिव पृच्छतो विरिंचस्य ।
दर्शयितुं निजशिल्पं वर्णकमिव विश्वकर्मणा विहितम् ॥ १७६ ॥

अश्रेयोभिरनाश्रितमभिभूतं नातिभूतिदोषेण ।
न स्वीकृतमुपसर्गैः कलिकालमलैरनालीढम् ॥ १७७ ॥

पातालतलं भोगिभिरम्भोधिर्विविधरत्नसंघातैः ।
सुरसदनं विबुधगणैर्द्रविणोपचयैः पुरं कुबेरस्य ॥ १७८ ॥
महिलाभिरसुरविवरं कटकं हि हिमाचलस्य गन्धर्वैः ।
हरिनगरं क्रतुयूपैः शमविभवैर्मुनिजनस्थानम् ॥ १७९ ॥
तिष्ठन्तु सकलशास्त्रव्यालोचनविमलबुद्धयो विप्राः ।
सदसद्गुणनिर्णीतौ ललना अपि निकषभूमयो यत्र ॥ १८० ॥
कलिकालोदितभीत्या क्रतुकृतबहुधूमकम्बलावरणः ।
तिष्ठन्निभृतोपि कृतश्चरितैरनुमीयते यत्र ॥ १८१ ॥
अपहरति पिधातुमिव स्वकलंकं शशधरः प्रसार्य करान् ।
रात्रौ यत्र वधूनां लावण्यं वदनकोषेभ्यः ॥ १८२ ॥
तिमिरपटलासिताम्बरमपहरदभिसारिकाजनौघस्य ।
निजतनुकान्तिवितानं वल्लभसम्भोगविहितये यत्र ॥ १८३ ॥
यत्र नितम्बवतीनां विचलन्नयनान्तशितशरैर्भिन्नः ।
शिथिलयति पथिकलोकः स्वकलत्रसमागमोत्कण्ठाम् ॥ १८४ ॥
यत्र च कुलमहिलानामन्पलं वचसि पाणिपादे च ।
स्वच्छत्वमाशये च व्यालोलत्वं विशालनेत्रे च ॥ १८५ ॥
स्तनजघनचिकुरभारे घनता जीवेशसहजरागे च ।
कुलदेवतार्चनविधौ बलिशोभा मध्यभागे च ॥ १८६ ॥
गम्भीरता स्वभावे चेतोभवबाणतूणनाभौ च ।
विस्तीर्णता नितम्बे गुरुजनपूजानुरक्तचित्ते च ॥ १८७ ॥

---

१ 'वारिरत्ननिचयैश्च' इति ब० पा० । २ 'हैमाचलस्य' इति ब० पा० ।
३ 'हष' इति मु० पा० ।

हरिणायतेक्षणानां विच्छित्तिः कोषहरणमङ्गे[१]षु ।
कुटिलत्वमलकपंक्तौ बालानां कामचेष्टितं यत्र ॥ १८८ ॥
संयमनमिंद्रियाणामिनोपघातग्रहस्तमिस्रस्य ।
स्तब्धत्वं तालतरौ हारलतास्तरलसंगता यस्मिन् ॥ १८९ ॥
भुजगाः पररंध्रदृशः खण्ड्यन्ते प्रियतमाधरा यत्र ।
सूचीव्यथानुभूतिर्नृत्याभ्यासप्रवृत्तानाम् ॥ १९० ॥
नतवपुरप्यतिसरला मन्थरगमनापि नर्मदा यस्मिन् ।
गुरुजनशास्त्ररतापि स्वभावमु[१]ग्धाङ्गनाजनता ॥ १९१ ॥
तस्मिन्मखशतपूतः पुरुहूत इव द्विजन्मनां प्रव[२]रः ।
गुरुरिव विद्यावसतिर्वसति स्म पुरंदरो नाम्ना ॥ १९२ ॥
धर्मात्मजस्य सत्यं त्रिपुररिपोर्विजितकुसुमचापलम् ।
हरिनाभिपंकजभुवो नियतेन्द्रियतां जहास यः सततम् ॥ १९३ ॥
न्यक्कृतवृष इति शर्वे याचक इति कौस्तुभाभरणे ।
पीडितवसुधासुत इति कपिले न बभूव यस्य बहुमानः ॥ १९४ ॥
मार्गानु[४]गतौ लुब्धो यः प्राणिवपुर्विनाशविमुखोऽपि ।
परिहृतपरदारोऽपि स्वाकांक्षितगुरुजनप्रमदः ॥ १९५ ॥
यस्यान्वये महीयसि सरसीव समस्तसत्त्वनिजवसतौ ।
सच्चरितजन्मभूमौ विनिवारितकलिमलप्रसरे ॥ १९६ ॥
पितृतर्पणप्रसङ्गे खड्गग्रहणं न शौर्यदर्पे च ।
त्रुटनं मेखलिकानां वटुकजने नो रताभिसंमर्दे ॥ १९७ ॥

---

१ 'स्वे' इति मु० पा० ।
१ 'सुभगा' इति मु० पा० ।
२ 'प्रथमः' इति ब० पा० ।
४ 'नुदतौ' इति ब० पा० ।

श्रुतिभेदेषु विवादो नो रिक्थविभागमन्युना कलितः ।
तेजस्विता हविर्भुजि न शमैकरतेषु भूमिदेवेषु ॥ १९८ ॥
जरतामेव स्खलनं जपतामेवाधरस्फुरणम् ।
यजतामेव समिद्रुचिरेणाजिन एव कृष्णसंपर्कः ॥ १९९ ॥
तस्याभूत्सकलकलोद्भासितपक्षद्वय[1]स्य सुत एकः ।
नाम्ना सुन्दरसेनः कच इव वचसामधीशस्य ॥ २०० ॥
पशुपतिनयनकृताशनभस्मितमवधार्य यं वपुष्मन्तम् ।
अपरमिव कुसुमचापं रतिरतये निर्ममे धा[2]ता ॥ २०१ ॥
तिष्ठन्तु तावदन्याः कुलललना यस्य रूपमवलोक्य ।
सापि महामुनिदयिता कृच्छ्रेण ररक्ष चारित्रम् । २०२ ॥
कलधौतफलकशोभां बिभ्राणं यस्य पृथुतरं वक्षः ।
दृष्ट्वा चिराय लक्ष्मीर्हरिहृदये दुःस्थितिं मेने ॥ २०३ ॥
[3]कथमीदृग्यदि न कृतः शशिशकलैरथ कृतः कथं व्यथकः ।
इत्थं समीक्षमाणो निर्णयमगमन्न कामिनीसार्थः[4] ॥ २०४ ॥
यो जग्राह हिमांशोः प्रसन्नमूर्तित्वमचलतः स्थैर्यम् ।
जलधरत उन्नतत्वं गाम्भीर्यं यादसां पत्युः ॥ २०५ ॥
यो विनयस्य निवासो वैदग्ध्यस्याश्रयः स्थितेः स्थानम् ।
प्रियवाचामायतनं निकेतनं साधुचरितस्य ॥ २०६ ॥

---

१ 'यस्य' इति ब० पा० । २ 'धाता' इति मु० पा० ।
३ 'कथमार्द्रता द्विजकृतः शशिशकलैरथ कृतः कथं व्यथकः' इति मु० पा० ।
४ 'सार' इति ब० पा० ।

यो मदनः प्रमदानां तुहिनकरः साधुकुमुदषण्डस्य[1] ।
निकषोपलो गुणानां मार्गतरुः पथिकलोकस्य ॥ १०७ ॥
सज्जनगोष्ठीनिरतः काव्यकथाकनकनिकषपाषाणः ।
प्रणयिजनकल्पवृक्षो लक्ष्मीलीलाविहारभूमिश्च ॥ १०८ ॥
जलधिरिव तुहिनभासः सद्वृद्धिपरिचयः सुहृत्तस्य ।
सकलोपधाविशुद्धो बभूव गुणपालितो नाम्ना ॥ १०९ ॥
तेन समं स कदाचित्तिष्ठन्नहमि प्रसङ्गतः पतिताम् ।
केनापि गीयमानामशृणोदार्यामिमां सहसा ॥ ११० ॥
'देशान्तरेषु वेषस्वभावभणितानि ये न बुध्यन्ते ।
समुपासते न च गुरून्विषाणविकलास्त उक्षाणः' ॥ १११ ॥
आकर्ण्याथ तमूचे वचनमिदं सुन्दरः सुहृन्मुख्यम् ।
शोभनमेतद्गीतं गुणपालित साधुनानेन ॥ ११२ ॥
साधूनामाचरितं खलचेष्टां विविधलोकहेवाकान् ।
नर्म विदग्धैर्विहितं कुलटाजनवक्रकथितानि ॥ ११३ ॥
गुह्यगेहशास्त्रतत्त्वं[2] विटवृत्तं धूर्तवंचनोपायान् ।
वारिधिपरिखां पृथ्वीं जानाति परिभ्रमन्पुरुषः ॥ ११४ ॥

(युगलकम्[3])

अत उज्झित्य गृहस्थितिसुखलेशं विविधलाभपरिणामे ।
स्थापय गमनारम्भे वयस्य हृदयं मया सहितः ॥ ११५ ॥

---

१ 'खण्डस्य' इति मु० पा० । २ 'गूढ' इति मु० पा० ।
३ हस्तपुस्तकद्वये नास्ति ।

इत्थं निगदितवन्तं सुहृदुत्तरलाभलालसात्मानम् ।
ऊचे सुन्दरसेनं लज्जित इव सहचरो वचनम् ॥ २१६ ॥
अभ्यर्थनानुबन्धो लज्जाकर एव मादृशां किंतु ।
आकर्णय कथयामः पथिकानां यानि दुःखानि ॥ २१७ ॥
कर्पटकावृतमूर्तिर्दूराध्वपरिश्रमावसितशक्तिः ।
पांसूत्कटधूसरितो दिनावसाने प्रतिश्रयाकाङ्क्षी ॥ २१८ ॥
मातर्भगि[1]नि दयां कुरु मा मैवं निष्ठुरा भव तथापि ।
कार्यवशेन गृहेभ्यो निर्यान्ति भ्रातरश्च पुत्राश्च ॥ २१९ ॥
किं वयमुत्पाठ्य गृहं प्रातर्गन्तार ईदृगेव सताम् ।
भवति निवासो यस्मिन्निज इव पथिकाः प्रयान्ति विश्रामम् ॥
२२० ॥
अद्य रजनीं नयामो यथाकथंचित्त्व[2]दाश्रये मातः ।
अस्तं गतो विवस्वान्वद सम्प्रति कुत्र गच्छामः ॥ २२१ ॥
इति बहुविधदीनवचाः प्रतिगेहद्वारदेशमधितिष्ठन् ।
निर्भर्त्स्यते वराको गृहिणीभिरिदं वदन्तीभिः ॥ २२२ ॥
न स्थित इह गेहपतिः किं रटसि वृथा प्रयाहि देवकुलम् ।
कथितेऽपि नापगच्छति पश्य मनुष्यस्य निर्बन्धम् ॥ २२३ ॥
अथ यदि कथंचिदपरः पुनः पुनर्याचितो गृहस्वामी ।
निर्दिशति सावधीरणमत्र स्वपिहीति जी[3]र्णगृहकोणे ॥ २२४ ॥

---

१ 'जननि' इति ब॰ पा॰ । २ 'त्वदाश्रमे' इति मु॰ पा॰ ।
३ 'शीर्ण' इति ब॰ पा॰ ।

तत्र कलहायमाना तिष्ठति गृहिणी विभात[1]रीप्रहरम् ।
अज्ञाताय किमर्थं वासो दत्तस्त्वयेति सह भर्त्रा ॥ २२५ ॥
ईदृगयं सरलात्मा किं कुर्मो भगिनि तावको भर्ता ।
त्वादृशि गेहेऽवहिता भ्रमन्ति खलु वंचका एवम् ॥ २२६ ॥
इति भाजनादियाच्ञां बुद्धौ विनिधाय निकटवर्ति[2]नो गेहात् ।
[3]नारीजनः समेत्य ब्रूते तामाप्तभावेन ॥ २२७ ॥ (युग्मम्)
गृहशतमधिकमटित्वा कलमकुलत्थाणुचणमसूरादि ।
एकीभूतं भुंक्ते क्षुधोपतप्तोऽध्वगो भैक्षम् ॥ २२८ ॥
परवशमशनं वसुधा शयनीयं सुरनिकेतनं सद्म ।
पथिकस्य विधिः कृतवानुपधानकमिष्टिकाखण्डम् ॥ २२९ ॥
इति निगदितवति तस्मिन्सुन्दरसेनस्य चोत्तरावसरे ।
इयमुपगीता गीतिः केनापि कथाप्रसङ्गेन ॥ २३० ॥
'निजवरभवनं सुरगृहमुर्वीतलमतिमनोहरं शयनम् ।
कदशनममृतमभीप्सितकार्यैकनिविष्टचेतसां पुंसाम्' ॥ २३१ ॥
तां[4] च श्रुत्वा सुहृदं पौरन्दरिरिदमुवाच परितुष्टः ।
मम हृदयगतं प्रकटितमेतेन सहैव[5] गच्छामः ॥ २३२ ॥
अथ सहचरद्वितीयः क्लेशसमुद्रावतरणकृतचित्तः ।
निरगात्सुन्दरसेनः कुसुमपुरादविदितः पित्रा ॥ २३३ ॥

---

१ 'वरीं सकलाम्' इति सु० पा० । २ 'वर्तिगृहात्' इति ब० पा० ।
३ 'नारी समभ्युपेता' इति ब० पा० । ४ 'समुपश्रुत्य च' इति ब० पा० ।
५ 'भवतु गच्छावः' इति ब० पा० ।

पश्यन्विदग्धगोष्ठीरभ्यस्यन्नायुधानि विविधानि।
शास्त्रार्थानधिगच्छन्विलोकयन्कौतुकान्यनीकानि ॥ २३४ ॥
जानन्पत्त्रच्छेदनमालेख्यं शिल्पपुस्तकर्माणि।
नृत्यं गीतोपचितं तन्त्रीमुरजादिवाद्यभेदांश्च ॥ २३५ ॥
बुध्यन्वंचकभङ्गीर्विटकुलटानर्मवक्रकथितानि।
बभ्राम सुहृत्सहितः सुन्दरसेनो महीमखिलाम् ॥ २३६ ॥

(सन्दानितकम्)

अथ विदितसकलशास्त्रो विज्ञाताशेषजनसमाचारः।
निजगृहगमनाकाङ्क्षी स शिलोच्चयमर्बुदं प्राप ॥ २३७ ॥
तत्पृष्ठदेशदर्शनलोलम[1]तिं सुन्दरं परिज्ञाय।
गुणपालितो बभाषे विलोक्यतामद्रिराज इति ॥ २३८ ॥
एष सुतः सानुमतः स्यन्दच्छीताच्छसलिलसम्पन्नः।
लोकानुकम्पयेव प्रालेयमहीभृता मरौ न्यस्तः ॥ २३९ ॥
शिशिरकरकान्तमौलिः कटकस्थितपवनभोजनः सगुहः।
विद्याधरोपसेव्यो बिभर्त्ति लक्ष्मीमयं शंभोः ॥ २४० ॥
अत्र तरुशिखरसंगतसुमनस इति जातनिश्च[2]यो मन्ये।
अभिलषति समुच्चेतुं तारा निशि मुग्धकामिनीलोकः ॥ २४१ ॥
आश्चर्यं यदुपान्ते तिष्ठन्त्येतस्य सप्त मुनयोऽपि।
अथवा कस्याकर्षं न करोति समुन्नतिर्महताम् ॥ २४२ ॥

---

१ 'मलं' इति ब० पा०। २ 'विस्मयो' इति सु० पा०।

अवग[1]त्य निरवलम्बनमम्बरमार्गं पतंगतुरगाणाम् ।
अयमवनिधरो मन्ये विश्रान्त्यै वेधसा विहितः ॥ २ ४ ३ ॥

इममाश्रित्य हिमांशोरोषधयः संनिकर्षमुपयाताः ।
प्रत्यासत्तिः प्रभुणा प्रायोऽनुग्राहकवशेन ॥ २ ४ ४ ॥

सेतुमिवाशाकरिणो विसृजत्ययमवनिधरणपरिखिन्नान् ।
निर्झरसलिलकणौघान् भवति हि सौहार्दमेककार्याणाम् ॥ २ ४ ५ ॥

हारीताहितशोभो मुदितशुको व्यासयोगरमणीयः ।
विश्रान्तभरद्वाजः समतामयमेति मुनिनिवासस्य ॥ २ ४ ६ ॥

अस्मिन्निःसंगा अपि परलोकप्राप्त्युपायकृतयत्नाः ।
गन्धवहभोजना अपि न हिंसका फलभुजोऽपि न प्लवगाः ॥ २ ४ ७ ॥

शुभकर्मैकरता अपि षट्क[2]र्माणोऽयता अपि स्ववशाः ।
अनभिमतरौद्रचरिताः शिव[3]प्रिया अपि वसन्ति शमनिरताः ॥
२ ४ ८ ॥ (युग्म[4]म्)

मूर्तिरिव शिशिररश्मेर्हरिणवती सप्तपत्त्रकृतशोभा ।
सरणिरिव चण्डभासः पलाशिनी यातुधानजायेव ॥ २ ४ ९ ॥

सोत्कण्ठेव समदना वासकसज्जेव कृततिलकशोभा ।
बक[5]हरिपीलुसनाथा नरनाथद्वारभूमिरिव ॥ २ ५ ० ॥

अर्जुनबाणशतैः कुरुनाथवरूथिनीव संकीर्णा ।
चञ्चत्सहस्रोपचिता लक्ष्मीरिव गगनदेशस्य ॥ २ ५ १ ॥

---

१ 'अवलम्ब्य' इति मु॰ पा॰ । २ 'षट्कर्मण्यायता' इति मु॰ पा॰ । ३ 'श्रितप्रिया' इति मु॰ पा॰ । ४ 'कुलकम्' इति मु॰ पा॰ । ५ 'धव' इति ब॰ पा॰ ।

ध्वजिनीव दानवानां मृष्टकमधिष्ठिता श्रियामेव ।
उद्यातरोहिणीका रम्येयमुपत्यका भाति ॥ २५१ ॥

(कलापकम्)

इति दर्शयति वयस्ये सुन्दरसेने च पश्यति प्रीत्या ।
स्वप्रस्तावोपगता गीतिरियं केनचिद्गीता ॥ २५२ ॥
'अतिशयितनाकपृष्ठं पृष्ठं ये नार्बुदस्य पश्यन्ति ।
बहुविष[1]यपरिभ्रमणं मन्ये क्लेशाय केवलं तेषाम्' ॥ १५४ ॥
आकर्ण्य च स बभाषे महात्मनानेन युक्तमुपगीतम् ।
शिखरिशिरः पश्यामो वयस्य रम्यं समारुह्य ॥ २५५ ॥
अथ गिरिवरमारूढो विलोकयन्विविधविबुधभवनानि ।
वापीरुद्यानभुवः सरांसि सरितश्चचार विस्मेरः ॥ २५६ ॥
अचिराभामिव विघनां ज्योत्स्नामिव कुमुदबन्धुना विकलाम् ।
रतिमिव मन्मथरहितां श्रियमिव हरिवक्षसः पतिताम् ॥ २५७ ॥
हस्तो[2]च्चयं विधातुः सारं सकलस्य जंतुजातस्य ।
दृष्टान्तं रम्याणां श[3]स्त्रं संकल्पजन्मनो जैत्रम् ॥ २५८ ॥
विकसितकुसुमसमृद्धिं शृंगाररसापगैककलहंसीम् ।
लीलापल्लववल्लीं प्रतिनामवधानवर्मणां भल्लीम् ॥ २५९ ॥
विचरन्नुपवनमण्डपपुष्पप्रक[4]राभिरामभूपृष्ठे ।
रममाणां सह सख्या ललनामालोकयामास ॥ २६० ॥

(कुलकम्)

१ 'देश' इति ब० पा० । २ 'हस्तोलकम्' इति मु० पा० ।
३ 'नामस्त्रं' इति ब० पा० । ४ 'प्रसरा' इति ब० पा० ।

अवलोकयतस्तस्य स्मरमाय[1]कवेध्यतामुपगतस्य ।
इदमभवन्मनसि चिरं विस्मयभा[2]राभिभूयमानस्य ॥ २६१ ॥
क्वेदं खलु विश्वसृजः कौशलमत्यद्भुतं समुपजातम् ।
येन विरुद्धानामपि घटितैकत्र स्थितिस्तथाह्वीयम् ॥ २६२ ॥
ललितवपुर्निर्दोषा स्फुरदुज्ज्वलतारकाभिरामा च ।
निर्वाच्यवदनकमला जितवीणा क्वणितवाणी च ॥ २६३ ॥
प[3]कटितविग्रहसंस्थितिरतिशोभाघटितसंधिबन्धा च ।
उन्नतपयोधराढ्या शरदिन्दुकरावदाता च ॥ २६४ ॥
अभिमतसुगतावस्थितिरभिनन्दितचरणयुगलरचना च ।
अतिविपुलजघनदेशा विध्वस्तशरीरविहितशोभा च ॥ २६५ ॥
आविर्भवदनुरागे तस्मिन्नथ वलितलोचना सहसा ।
सापि बभूव मृगाक्षी हस्तगता कुसुमचापस्य ॥ २६६ ॥
तन्मूलमाश्रिताया विस्मृतसकलान्यकर्मणः सपदि ।
तस्या गात्रलतायामंकुरितं सात्त्विकैर्भावैः ॥ २६७ ॥
सैवोपवनसमृद्धिस्तस्मिन्नेव क्षणे स्मरं समा[4]श्रित्य ।
तां व्यथयितुमारेभे प्रभोर्हि कृत्यं करोति खलु सर्वः ॥ २६८ ॥
गात्र[5]सरसंधनेभ्यः प्रस्वेदजलं विनिर्ययौ तस्याः ।
अन्तर्ज्वलितमनोभवहव्यभुजा दह्यमानेभ्यः ॥ २६९ ॥

१ 'मार्गण' इति ब० पा० ।　　२ 'भावा' इति ब० पा० ।
३ 'संविच्छित' इति ब० पा० ।　　४ 'स्मृत्वा' इति ब० पा० ।
५ 'गात्रसिरासन्धिभ्यः' इति मु० पा० ।

कुसुमशरजालपतिता मुहुर्मुहुर्विदधती विवृत्तानि[1]।
अनिमेषं पश्यन्ती मत्स्यवधूमनुचकार सा तन्वी ॥ २७०॥

स्तब्धतनुं सोत्कम्पां पुलकवतीं स्वेदिनीं सनिःश्वासाम्।
विदधे तामसमशरः क्रीडति हि शठो विशिष्टमासाद्य॥ २७१॥

उच्छ्वासैरुल्लसनं कुचयुगले सौष्ठवं विलासा[2]नाम्।
अभिलषितेन प्रेम्णा स्निग्ध[2]त्वं चक्षुषोर्मनोहारि॥ २७२॥

अनुरक्त्या वदन[3]रुचिं वचसि च गमने च साध्वसस्खलनम्।
तस्या मदनः कुर्वन् उपनिन्ये चारुतामवधि[4]म्॥ २७३॥

(युग्मम्)

पार्श्वगतेऽपि प्रेयसि कामशरासारताड्यमानापि।
न शशाक साऽभिधातुं चित्तगतं प्रणयभङ्गतो भीता॥२७४॥

अथ विदितचित्तवृत्तिः सकृद्दृशं प्रियतमे समाकृष्य।
मदनेन दह्यमानां विहसितविशदं जगाद तामाली॥२७५॥

अयि हारलते संहर हरहुंकृतिदग्धदेहसंक्षोभम्।
सद्भावजानुरक्तिर्नहि र[5]म्या पण्यनारीणाम्॥ २७६॥

अवधीरय धनविकलं कुरु गौरवमकृशसम्पदः पुंसः।
अस्मादृशां हि मुग्धे धनसिद्ध्यै रूपनिर्माणम्॥ २७७॥

अभिरामेऽभिनिवेशं विदधाना विवि[6]धलाभनिरपेक्षा।
उपहस्यसे सुमध्ये विदग्धवाराङ्गनावारैः॥ २७८॥

---

१ 'विलसितानि' इति मु॰ पा॰। २ 'स्निग्ध वचन मनोहारि' इति मु॰ पा॰।
३ 'वचनरुचि' इति मु॰ पा॰। ४ 'मधिकाम्' इति ब॰ पा॰।
५ 'पथ्यं' इति ब॰ पा॰। ६ 'विभव' इति ब॰ पा॰।

येषां श्लाघ्यं यौवनमभिमुखतामुपगतो विधिर्येषाम् ।
फलितं येषां सुकृतैर्जीवितसुखितार्थिता येषाम् ॥ २७९ ॥
तेऽवश्यं स्वयमेव त्वामनुबध्नंति मदनशरभिन्नाः ।
नहि मधुलिहः कृशो[1]दरि मृग्यन्ते चूतमंजर्या ॥ २८० ॥

(युगलकम्)

इति गदितवतीमालीं कामशरासारभिन्नसर्वांगी ।
अव्यक्तस्खलिताक्षरमूचे कृच्छ्रेण हारलता ॥ २८१ ॥
सखि कुरु तावद्यत्नं ब[2]हुमनसिजवेदनाप्रतीकारे ।
क्रोडीकृता विपत्त्या न भवन्त्युपदेशयोग्या हि ॥ २८२ ॥
अस्वायत्तः प्रेयान्मृदुपवनः सुरभि[3]माश उद्यानम् ।
इयती खलु सामग्री भवति हि क्षीणायुषामेव ॥ २८३ ॥
सत्वा मदनाशीविषविषवेगाकुलितविग्रहामालीम् ।
समुपेत्य शशिप्रभया पौरंदरिरभिदधे कृतप्रणतिः ॥ २८४ ॥
यदि नाम रुणद्धि गिरं गणिकाभावोपजनितवैलक्ष्यम् ।
तदपि कथनीयमेव स्निग्धापदि नहि निह्नूयते युक्तम् ॥ २८५ ॥
एतावति संसारे परिगणिता एव ते सुज[4]न्मानः ।
आपन्नपरित्राणे व्याकुलमनसः स्फुरन्ति ये बुद्धौ ॥ २८६ ॥
यस्मिन्नेव मुहूर्ते यद[5]वधि दृष्टोऽसि मे सख्या ।
तत एवारभ्य गता विधेयतां दग्धमदनस्य ॥ २८७ ॥

१ 'सुन्दरि' इति ब० पा० । २ 'पटुतरमति' इति मु० पा० ।
३ 'सुरभिकुसुममुद्यानम्' इति ब० पा० । ४ 'सुजनाः' इति मु० पा० ।
५ 'चक्षुर्विषयं गतोऽसि मम सख्या' इति ब० पा० ।

रोमोद्गमसंनद्दनं भित्त्वान्तर्विग्रहं परापतिताः।
तस्या मानससम्भवकोदण्डविनिर्गता इषवः॥ २८८॥

किं[1] वा वदतु वराकी कुत्र समाश्वसितु यातु कं शरणम्।
पीडयति भृशं यस्मान्नित्यं[2] शुचिदक्षिणो मृदुः पवनः॥२८९॥

वचसि गते गद्गदतामुज्झितमौनव्रताश्चिराय पिकाः।
दृष्ट्वा व्यथयन्ति सखीं जातावसरा निरर्गलं विरुतैः॥ २९०॥

स्खलिताकुलिते गमने तन्वङ्ग्या अगणितश्रमा हंसाः।
सुचिराल्लब्धावसराः कुर्वंति गतागतानि परितुष्टाः॥ २९१॥

उष्णोच्छ्वसितसमीरै[3]र्विदह्यमानोऽपि मधुकरस्तस्याः।
अलककुसुमं न मुंचति कृच्छ्रेष्वपि दुस्त्यजा विषयाः॥ २९२॥

नो वारयति तथा मां साम्प्रतमिति कथयतीव मधुलेहः।
निःसत्त्ववपुषः कर्णे श्रुतिपूरकपुष्पसंगतो गुंजन्॥ २९३॥

प्रशिथिलभुजलतिकायास्तस्याः पतितस्य हेमकटकस्य।
यत्प्रापणं पृथिव्यास्तस्मिन् खलु मुक्तहस्तता हेतुः॥ २९४॥

रशनागुणेन विगलितमेकपदे तन्नितम्बतश्चिरम्।
पतनाय नियतमथवा निषेवणं गुरुकलत्रस्य॥ २९५॥

अङ्गीकृत्य मनोभवसुरभि तथा लालितोऽपि हतहारः।
तापयति सखीं तत्क्षणमन्तर्भिन्नात्कृतः कुशलम्॥ २९६॥

---

१ 'किं विदधातु' इति ब० पा०।
२ 'नित्यशुचिर्दक्षिणो मृदुः पवनः' इति ब० पा०।
३ 'समीपे विद...' इति मु० पा०।

वक्षसि[1] तत्स्वेदजलं कज्जलमलिनाश्रुवारिणा मिश्रम् ।
कुचतटपतितं तस्याः प्रयागसम्भेदसलिलमनुकुरुते ॥ २९७ ॥
पिकरुतमलयसमीरणसुमनःस्मरभृङ्गदहनपरिकलिता ।
पंचतपश्चरति भवत्परिरम्भणसौख्यलम्पटा बाला ॥ २९८ ॥
न परापतति वराकी दशमीं यावन्मनोभवावस्थाम् ।
त्रायस्व सुभग तावच्छरणागतरक्षणं व्रतं महताम् ॥ २९९ ॥
अथ तद्वचसि कृतादरमुद्भूतमनोभवं समवधार्य ।
अवगीतिभीतचेता ऊचे गुणपालितः सुहृदम् ॥ ३०० ॥
यद्यपि मारप्रसरो दुर्वारः प्राणिनां नवे वयसि ।
चिन्त्यं तदपि विवेकिभिरवसानं वा[2]रयोषितां प्रेम्णः ॥ ३०१ ॥
वारस्त्रीणां विभ्रमरागप्रेमाभिलाषमदनरुजः ।
सहवृद्धिक्षयभाजः प्रख्याताः सम्पदः सुहृदः ॥ ३०२ ॥
ताभिरवदातजन्मा कुर्वीत [3]समागमं कथं यासाम् ।
क्षणदृष्टोऽपि प्रणयी रूढप्रणयोऽपि जन्मनोऽपूर्वः ॥ ३०३ ॥
प्रद्युम्नः प्रद्युम्नो विरूपकः खलु विरूपकः सततम् ।
सुस्निग्धः सुस्निग्धो रुचो रुचस्तु गणिकानाम् ॥ ३०४ ॥
यासां जघनावरणं परकौतुकवृद्धये न तु त्रपया ।
उज्ज्वलवेषा रचना कामिजनाकृष्टये न तु स्थितये ॥ ३४० ॥
मांसरसाभ्यवहारः पुरुषाहतिपीडया न तु स्पृहया ।
आलेख्यादौ व्यसनं वैदग्ध्यख्यातये न तु विनोदाय ॥ ३०६ ॥

---

१ 'वासितं' इति ब० पा० । २ 'येषयोषितां' इति ब० पा० ।
३ 'करोति संगं' इति मु० पा० ।

रागोऽधरे न चेतसि सरलत्वं भुजलतासु न प्रकृतौ ।
कुचभारेषु समुन्नतिराचरणे नाभिनन्दिते सद्भिः ॥ ३०७ ॥
जघनस्थलेषु गौरवमाकृष्टधनेषु नो कुलीनेषु ।
अलसत्वं गमनविधौ नो मानववंचनाभियोगेषु ॥ ३०८ ॥
वर्णविशेषापेक्षा प्रसाधने नो रतिप्रबन्धेषु[1] ।
ओष्ठे मदनामङ्गो नो पुरुषविशेषसम्भोगे ॥ ३०९ ॥
या बालेऽपि[2] सरागा वृद्धेष्वपि विहितमन्मथावेगा ।
क्लीवेष्वपि कान्तदृशः साकाङ्क्षा दीर्घरोगेऽपि ॥ ३१० ॥
स्वेदाम्बुकणोपचिता न चार्द्रता निजनिवासमनसश्च ।
आविष्कृतवेपथवो वज्रोपलसारकठिनाश्च ॥ ३११ ॥
जघनचपला अनार्या परभृतयः कृतकनेत्ररागाश्च ।
सर्वांगार्पणदक्षा असमर्पितहृदयदेशाश्च ॥ ३१२ ॥
न कुलसमुत्पन्ना अपि भुजंगदंश[3]नकृतवेदनाभिज्ञाः ।
कंदर्पदीपिका अपि रहिताः स्नेहप्रसङ्गेन ॥ ३१३ ॥
उज्झितवृषयोगा अपि रतिसमये नरविशेषनिरपेक्षाः ।
कृष्णौकाभिरता अपि हिरण्यकशिपुप्रियाः सततम् ॥ ३१४ ॥
मेरुमहीधरभुव इव किंपुरुषसहस्रसेवितनितम्बाः ।
नीतय इव भूभिभृतां सुपरिहृतानर्थसंयोगाः ॥ ३१५ ॥
बकमित्रक[4]रजदारणलब्धाभ्युदयाः सरोरुहिण्य इव ।
डाकिन्य इव च रक्तव्याकर्षणकौशलोपेताः ॥ ३१६ ॥

---

१ 'प्रसंगेषु' इति ब० पा० । २ 'षु' इति ब० पा० ।
३ 'दर्शनसुते...' इति मु० पा० । ४ 'करवि...' इति मु० पा० ।

प्रतिपुरुषं संनिहिताः कृत्यपरा विविध[1]विकरणोपेताः ।
बहुलार्थग्राहिण्यः प्रकृतय इव दुर्ग्रहा गणिकाः ॥ २१७ ॥

(अर्थचतुष्टयमत्र)

सादरमा[2]श्लिष्य चिरं कुसुमस्तवकं च नरविशेषं च ।
रिक्तीकर्तुं निपुणाः चुद्राः चुद्राश्च चुम्बन्ति ॥ २१८ ॥

परमार्थकठोरा अपि विषयगतं लोहकं मनुष्यं च ।
चुम्बकपाषाणशिला रूपाजीवाश्च कर्षन्ति ॥ २१९ ॥

पुरुषाक्रांताः सततं कृत्रिमशृंगाररागरमणीयाः ।
आहन्यमानजघनाः करेणवो वारयोषाश्च ॥ २२० ॥

उचितगुणोत्क्षिप्ता अपि पुरतोऽपि निवेशिते सुवर्णलवे ।
झगिति पतंति मुखेन प्रकट[3]प्रमदा यथा च तुलाः ॥ २२१ ॥

बहिरुपपादितशोभा अन्तस्तुच्छाः स्वभावतः कठिनाः ।
वेश्याः समुद्गिका इव कणन्ति यंत्रप्रयोगेण ॥ २२२ ॥

बध्नंति येऽनुरागं दैवहतात्मासु वारवनितासु ।
ते निस्सरंति नियतं पाणिद्वयमग्रतः कृत्वा ॥ २२३ ॥

इदमुपदिशति वयस्ये सुन्दरसेने च मन्मथव्यथिते ।
प्रस्तावादुप[4]यातं गीतित्रयमभ्यधायि केनापि ॥ २२४ ॥

"तरुणीं रमणी[5]याकृतिमुपनीतां स्मृतिभुवा वशीकृत्य ।
परिहरति यो जडात्मा प्रथमोऽसौ नालिको विना भ्रांतिम् ॥२२५॥

---

१ 'करणकोपचिताः' इति मु० पा० ।
२ 'श्लिष्य' इति ब० पा० ।
३ 'कलाधिकाश्च' इति ब० पा० ।
४ 'गातुं' इति मु० पा० ।
५ 'बाणसमर्पितहार - - -' इति ब० पा० ।

इदमेव हि जन्मफलं जीवितफलमेतदेव यत्पुंसाम् ।
लटहनितम्बवतीजनसम्भोगसुखेन याति तारुण्यम् ॥३२६॥
सुमनोमार्गणदहनज्वालावलिदह्यमानसर्वाङ्ग्यः ।
प्रबलप्रेमप्रवणाः प्रमदाः स्पृहयन्ति नाल्पपुण्येभ्यः" ॥ ३२७ ॥
एवमुपश्रुत्य वचः समुवाच पुरंदरात्मजः सुहृदम् ।
मम हृदयादिव कृष्टा गीतमिदं साधुनाऽनेन ॥ ३२८ ॥
तदनुसायकविकलां हारलतां हरिणशावतरलाचीम् ।
आश्वासयितुं यामो गुणपालित किं विकल्पितैर्बहुभिः ॥ ३२९ ॥
अथ त[१]त्र कापि गणिका गणयंती परिचितं हृतद्रविणम् ।
प्रविशन्तमेव मन्दिरमीर्ष्याव्याजेन निरुरोध ॥ ३३० ॥
काचिद्वंचकदत्तं पुं[२]जीकृतजीर्णवसनमवलोक्य ।
वेश्या विषीदति स्म उपायाचये वृत्त[३]कर्तव्या ॥ ३३१ ॥
दैवसत्या पतितं दृष्टिपथे भग्नमूल्यविटमेका ।
ज्वलिता रुषा भुजिष्या जग्राह जवेन धाविला ॥ ३३२ ॥
अन्तःस्थितकामिग्टहद्वारगतं लुप्तवित्तनरमन्या ।
समुवाच कुट्टनी "[४]व्रज कल्लोलाकल्पदेहेति । ३३३ ॥
प्रकटितदशननखक्षतिरभिदधती राजपुत्ररतियुद्धम् ।
अपरा पुरः सखीनां वारवधूराततान सौभाग्यम् ॥ ३३४ ॥

---

१ 'यत्र' इति ब० पा० ।

२ 'लुण्डी' इति ब० पा० ।

३ 'व्यर्थं' इति मु० पा० ।

४ 'तं व्रज कल्लोलाकल्पदेहेति' इति ब० पा० ।

अन्या कामिस्पर्धावर्धितभाटी समुत्सुका चण्डी ।
सौभाग्यगर्वदर्पं समुवाह विलासिनीमध्ये ॥ ३३५ ॥

एकगणिकानुबन्धे क्रोधोद्यतशस्त्रकामिनोः कापि ।
सम्भ्रमतो धावित्वा निवारयामास कुट्टनी कलहम् ॥ ३३६ ॥

धनमाहृत्य बहुभ्यो भुज्यत एकेन केनचित्सार्धम् ।
इति धनवन्तं कामिनमावर्जयति स्म वारवधूः ॥ ३३७ ॥

गा[1]यन् गाथामात्रं द्विपदकमथ सौष्ठवेन विट एकः ।
बभ्राम पुरो दास्या विदधद्विकृतीरनेकविधाः ॥ ३३८ ॥

कश्चित्पण्यस्त्रीणां विभवोपचितान्यपुरुषयोजनया ।
विदधाति स्माराधनमधनत्वमुपागतः कामी ॥ ३३९ ॥

त्वयि सक्तेन मया गृहमुज्झितमधुना परेव जातासि ।
इति ढौकमलभमानः कश्चिद्गणिकामुपालेभे ॥ ३४० ॥

उषितामपरेण समं वृद्धविटानां पुरः पराजित्य ।
पूज[2]यति स्म भुजंगः कश्चिद्गणिकां द्विगुणभाट्या ॥ ३४१ ॥

दृष्ट्वा[3] त्वया विशेषक वलयकलापौ शशिप्रभाभुजयोः ।
बाढं भण भण कीदृक्[4] चारुतरा सा मया दत्ता ॥ ३४२ ॥

अद्य चतुर्थो दिवसश्ची[5]नाम्बरयुगलकस्य दत्तस्य ।
तदपि परुषा[6] विलासा वद मदनक किं करोम्यत्र ॥ ३४३ ॥

---

१ 'गायन्मात्रागाथा द्विपदिकया' इति मु॰ पा॰ ।
२ 'त्याजयति स्म भुजगं कश्चिद्गणिकां द्विगुणभाटीम्' इति मु॰ पा॰ ।
३ 'दृष्टा' इति मु॰ पा॰ । ४ 'क्वानु तरः सोमया दत्तः' इति मु॰ पा॰ ।
५ 'चित्रा' इति मु॰ पा॰ । ६ 'परुषाभिधाना' इति मु॰ पा॰ ।

स्नेहपरा मयि केली कलहंसक किंतु राक्षसी तस्याः।
माता नात्मीकर्तुं वर्षशतेनापि शक्यते पापा ॥ ३४४ ॥
सुमनः कुंकुमवासः मन्जीकुरु किमिति तिष्ठसि विचिंतः।
अद्य तव दयितिकायाः किञ्[1]ल्कक नर्तनावसरः ॥ ३४५ ॥
यदि नाम पंच दिवसांस्त्वयि कुरुते प्रेम धनलवं दृष्ट्वा।
तदपि न रागवती सा कन्दर्पक किं वृथा गर्वः॥ ३४६ ॥
जीवन्नेव विलासक परिहर दूरेण मूढ़ हरिसेनाम्।
बद्धावेशस्तस्यां व्यापृतपुत्रो महाविषमः ॥ ३४७ ॥
केसरया चणदत्तं छलांशुकमुपरि कामिजालस्य।
स्तब्धग्रीवं भ्रमतश्चन्द्रोदय पश्य माहात्म्यम् ॥ ३४८ ॥
कौमारकं विह[2]न्तुं रतिसमये मदनसेनायाः।
इच्छामि किंतु तस्या मात्रातीव प्रसारितं वदनम् ॥ ३४९ ॥
विभ्रम कियतस्तपसः फलमेतद्यदुपभुज्यते मदिरा।
स्वकरेण पीतशेषा मदघू[3]र्णितमदनसेनया दत्ता ॥ ३५० ॥
कुवलयमालाभिलयो लीलोदय किमिति सम्प्रति त्यक्तः।
किं विदधासि तस्मिन्भ्रातर्दासी विना मूल्यम् ॥ ३५१ ॥
मुषिताशेषविभूतेरिन्दीवरकस्य यामिनी याति।
संवाहयतः सम्प्रति मंजीरक तिलकमंजरीचरणौ ॥ ३५२ ॥
अद्यापि बालभावं निखिलं न जहाति बालि[4]का तदपि।
प्रौढिम्ना मकरन्दक सकला ललना अधःकुरुते ॥ ३५३ ॥

---

१ 'रंगवती' इति ब० पा०। २ 'विधातुं' इति ब० पा०।
३ 'मधुघूर्णितदेवदत्तया' इति ब० पा०। ४ 'मदनिका' इति ब० पा०।

कुञ्जे गत्वा वञ्चयसि तं निर्दयचित्तनर्तनाचार्यम् ।
द्वारा सुकुमारतनुः किमि[1]ति असमय कारिता भवता ॥ ३५४ ॥
निः[2]सारोऽभिनिवेशः शुकशावकपाठने सुरतदेवि ।
तिष्ठति बहिरुपविष्टः प्रतीक्षमाणस्तव प्रेयान् ॥ ३५५ ॥
वीणावादनखिन्ना पतितास्ते वासभवनपर्यङ्के ।
उत्थापय तां त्वरितं स्मरलीलां मत्त[3] आयातः । ३५६ ॥
किमिदं यथास्थितत्वं तव माधवि यन्मुकुर्वदन्त्या मे ।
परिधत्से नाभरणं श्रीविग्रहराजसूनुना दत्तम् ॥ ३५७ ॥
ईदृक्शून्यमनस्त्वं किं कुर्मो मातरिन्दुलेखायाः ।
पा[4]नक्रीडासक्त्या पतितापि न चेतिता कनकनाडी ॥ ३५८ ॥
नकुलः पयो न पायित इति रोषवशादियं हि दुःशीला ।
नाश्नाति कामसेना पुनः पुनर्याच्यमानाऽपि ॥ ३५९ ॥
श्रीबलसुतपरिपालित ऊर्णायुः कि[5]ल मया विजेतव्यः ।
मुकुला मुक्तसुखस्थितिरहर्निशं मेषपोषणे लग्ना ॥ ३६० ॥
आताम्रतां समुपगतमुच्छूनं च करतलं तव ललिते ।
मा पुनरतिचिरमेवं प्रविधास्यसि कन्दुकक्रीडाम् । ३६१ ॥
अभिराम कन[6]कभाटी प्रथममियं गृह्यते समुत्पन्ने ।
स्नेहे तु कुसुमदेव्यास्त्वं प्रभवसि जीवितस्यापि ॥ ३६२ ॥

---

१ 'किमियं संमर्दकारिता भवताम्' इति मु० पा० ।
२ 'निःसरको' इति ब० पा० ।
३ 'भट्टपुत्रः' इति ब० पा० ।
४ 'पेन' इति ब० पा० ।
५ 'किमनया' इति मु० पा० ।
६ 'डोम्ब' इति ब० पा० ।

ग्रहणकमर्पय तावद्यदि कौतुकमुपरि चन्द्रले[1]खायाः ।
निर्वर्तितकर्तव्यो दास्यमि किंचिद्यथाभिमतम् ॥ २६३ ॥
न परमदाता मातः सूनुरसौ वा[2]सुदेवभट्टस्य ।
निर्लज्जः शठवृत्तिः पुनः पुनर्वार्यमाणोऽपि ॥ २६४ ॥
क्षपयति वसनानि सदा हठेन सकलानि सुरतसेनायाः ।
न ददात्येकामूर्णामुरणः परमस्ति कर्पासम् ॥२६५॥ (युग्मम)
भगिनि न मुंचति वेश्म क्षणमपि मे[3]क्षपटराजपुत्रोऽसौ ।
भग्नान्यतराव[4]सरो नग्नेनाधिष्ठितं यथा तीर्थम् ॥ २६६ ॥
इत्थंप्राया वाचः शृण्वन्विटकुट्टनीसमुद्गीर्णाः ।
तं वेशसंनिवेशं पश्यन प्रविवेश दारिकावेश्म ॥ २६७ ॥
(कुलकम्)

आकृष्टमिवोत्कतया स्नपितमिव स्निग्धचक्षुषः प्रसरैः ।
तमुपागतम[5]भ्यर्णं हारलता पूजयामास ॥ २६८ ॥
सुविहितसमुचितसंस्थितिरवनतशिरसा प्रणम्य तत्सख्या ।
इदमभिदधेऽतिनसं सुन्दरसेनः शुभावसरे ॥ २६९ ॥
प्रियदर्शन किं बहुभिः स्मर[6]पीडितदीनवचनसन्दर्भैः ।
इयमास्ते हारलता जीवनमस्यास्त्वदायत्तम् ॥ २७० ॥
निर्यन्त्रकेलिविशदं सहजप्रेमानुबन्धरमणीयम् ।
कार्यान्तरान्तरायैरपरिहृतं यातु यौवनं युवयोः ॥ २७१ ॥

---

१ 'सेनायाः' इति ब० पा० ।
२ 'नगररोट' इति ब० पा० ।
३ 'पटरा ...' इति ब० पा० ।
४ 'संगो' इति ब० पा० ।
५ 'त्यंतं' इति सु० पा० ।
६ 'पीडनवचनचाटुसंदर्भैः' इति सु० पा० ।

निर्दयमविरतवाञ्छं ध्व[1]स्तत्रपमव्यवस्थितावरणम् ।
उपचीयमानरागं सततं भूयाद्भवत्सुरतम् ॥ १७२ ॥
इति दत्त्वाशिषमन्तर्निर्याते परिजने तदङ्गेषु ।
विस्रम्भविविक्तरसो ववृधे कुसुमायुधः सुतराम् ॥ १७३ ॥
( विशेषकम् )

यदमन्दमन्मथोचितमनुरूपं यत्त[2]थानुरागस्य ।
यद्यौवनाभिरामं यच्च फलं जीवितव्यस्य ॥ १७४ ॥
अविनय एव विभूषणमश्लीलाचरणमेव बहुमानः ।
निःशंकतैव सौष्ठवमनवस्थितिरेव गौरवाधानम् ॥ १७५ ॥
केशग्रहणमनुग्रह उपकारस्ताडनं मुदे दंशः ।
नखविलिखनमभ्युदयो दृढदेहनिपीडनं समुत्कर्षः ॥ १७६ ॥
निगर[3]णलोलं चुम्बनमवयवनिष्पेषण[4]स्पृहो मर्दः ।
अंतःप्रवेशने[5]च्छं निर्भरपरिरम्भणं यस्मिन् ॥ १७७ ॥
यदनङ्गैरिव विहितं रागैरिव दीप्तिमत्त्वमुपनीतम् ।
प्रेमभिरिव नि[6]स्खलितं शृंगारैरिव विकाशमानीतम् ॥ १७८ ॥
अप्रागल्भ्यं व्यसनं धैर्यमकार्यं विवेक उपघातः ।
ह्रेपणमगुणो यस्मिन् तत्सुरतं प्रस्तुतं ताभ्याम् ॥ १७९ ॥
( कुलकम् )

१ 'स्रस्त' इति मु० पा० ।
२ 'तथा' इति मु० पा० ।
३ 'विगलल्लोल' इति मु० पा० ।
४ 'निःस्पृहो' इति मु० पा० ।
५ 'मिच्छन्नि' इति मु० पा० ।
६ 'निस्खलितं' इति मु० पा० ।

प्रारंभ एव तावत्प्रज्वलितो धगिति मनसिजो यस्मिन्।
तस्य विशेषावस्था वक्तुमशक्याः प्रवृद्धस्य॥ ३८०॥

सहजरसेन जडीकृतमिति यूनः कामशास्त्रनिर्णीतौ।
नानाकरणग्रामे लालि[1]त्यमवाप पाण्डित्यम्॥ ३८१॥

अवि[2]धेयमनाख्येयं प्रविचार्य क्वाद्नीयमविषह्यम्।
न बभूव तयोस्तस्मिन्नारब्धे सुरतपरिमर्दे॥ ३८२॥

अभ्य[3]स्ता या तन्व्या सुरतविधौ विविधचाटुपरिपाटी।
तामालूनविशीर्णां चकार सहजः स्मरावेगः॥ ३८३॥

सद्भावरागदीपितमदनाचार्योपदिष्टचेष्टानाम्।
कः परिगणनं कर्तुं रतिचक्राविष्टरमणयोः शक्तः॥ ३८४॥

बाला मृदुगात्रलता दृढपुरुषाक्रान्तविग्रहा न परम्।
न व्यथिता मुदमाप प्रभवति खलु चित्तजन्मनः शक्तिः॥ ३८५॥

किं रमणी रमणोऽविशदुत र[4]मणी रमणमिति न जानीमः।
स्वावयवावगमस्त्व[5]प्रकाशमगमत्तयोस्तदा निपुणम्॥ ३८६॥

तस्या निमीलितदृशो निःस्पन्दतनोर्बभूव सुरतान्ते।
लिङ्गमनङ्गच्छाया जीवितसत्तानुमान[6]स्य॥ ३८७॥

श्रमजलबिन्दूपचिता वृत्तस्मरणेन जातवैलक्ष्या।
सा शुशुभे रति[7]विरतौ पर्याकुलकेशभूषणा नितराम्॥ ३८८॥

---

१ 'लालित्यमियाय' इति मु० पा०। २ 'अभि' इति मु० पा०।
३ 'अत्यभ्यस्ता यान्या' इति मु० पा०।
४ 'रमणं सा न जानीमः' इति मु० पा०। ५ 'स्तु प्रकाश' इति ब० पा०।
६ 'नेन' इति मु० पा०। ७ 'विपरीता' इति मु० पा०।

निर्व्याशार्पितवपुषोर्निर्वृतिमयमेव गणयतोर्विश्वम् ।
क्षणदा विरराम तयोरक्षीणाकांक्षयोरेवम् । ३८९ ॥
मोहनविमर्दखिन्ना विजृम्भमाणा स्खलद्गतिर्मंदम् ।
निद्राकषायिताक्षी हारलता वासवेश्मनो निरगात् ॥ ३९० ॥
"परिचितपार्श्वगताहं तेन समं पानभोजनं कृत्वा ।
नीता निशा कथाभिर्मोहनकार्यं च यत्किंचित् ॥ ३९१ ॥
अविदग्धः श्रमकठिनो दुर्लभयोषिद्युवा जडो विप्रः ।
अपमृत्युरुपक्रान्तः कामिव्याजेन मे रात्रौ ॥ ३९२ ॥
नेच्छाविरतिः क्षणमपि न च शक्तिर्वस्तुशून्यरतियत्नैः ।
केवलमलमद्याहं कदर्थिता वृद्धपुरुषेण ॥ ३९३ ॥
मद्यवशादभियोक्तरि मृतकल्पे तल्पभागमग्नायाः ।
अनि[1]रोधितनिद्रायाः सुखेन मे यामिनी याता ॥ ३९४ ॥
सुकुमारसम्प्रयोगः पेशलवचनः सवक्रपरिहासः ।
शकु[2]नवशेन समेतो मम सखि रमणो मनोहराकारः ॥ ३९५ ॥
[3]पर्यंकान्तनिलीनः पराङ्मुखो मुक्तमन्दनिःश्वासः ।
मच्चो[4]दनया नितरां निःस्पन्दः खेदसलिलसंसिक्तः ॥ ३९६ ॥
पर्यस्तमितानङ्गोऽप्यपगतनिद्रः क्षपाक्षयाकांक्षी ।
यामोषितः प्रक्षीणो निष्प्रतिपत्तिः स्थितोऽद्य सखि मनुजः ॥
३९७ ॥ (कुल[5]कम्)

१ 'क्षवि' इति मु॰ पा॰ । २ 'कुशल' इति मु॰ पा॰ ।
३ 'पल्यंकाक' इति मु॰ पा॰ । ४ 'द्याचन' इति मु॰ पा॰ ।
५ 'युगलकम्' इति ब॰ पा॰ ।

शृणु सखि कौतुकमेकं ग्रामी[1]णककामिना यदद्य कृतम् ।
सुर[2]तरसमीलिताक्षी मृतेति भीतेन मुक्तास्मि ॥ ३९८ ॥
अविदितदेशप्रकृतेः शठात्मकाद्दुर्विदग्धतोऽस्माभिः ।
अनुभूतो राजसुतादधि[3]भाण्डविडम्बनाक्ले[4]शः ॥ ३९९ ॥
प्रियसखि लोकसमक्षं नगरप्रभुणा हठेन नीतास्मि ।
एवं[5] वंचकदातुर्द्विगुणार्थप्रार्थने कुतोऽन्यायः ॥ ४०० ॥
आकर्षन्ती जघनं व्रजसि यथा विलिखिता नखैस्तिलशः ।
मन्ये तथोपभुक्ता केरलि केनापि दाक्षिणात्येन ॥ ४०१ ॥
अधरे बिन्दुः कण्ठे मणिमाला स्तनयुगे शशप्लुतकम् ।
तव सूचयन्ति केत[6]कि कुसुमायुधशास्त्रपंडितं रमणम्" ॥
४०२ ॥
इति शृण्वन्नुषसि गिरो निर्वृत्तनिशाभियोगगणिकानाम् ।
सोऽपि यथाक्रियमाणं प्रविधातुं निर्जगाम कर्तव्यम् ॥ ४०३ ॥
( कुल[7]कम् )
सुर[8]चितरागोपचितिस्वीकृतमनसस्तया समं तस्य ।
यौवनसुखमनुभवतो जगाम संवत्सरः सार्धः ॥ ४०४ ॥

---

१ 'ग्रामीनककामुकेन यद्विचेष्टितम्' इति ब० पा० ।
२ 'रतिसुखनि' इति ब० पा० । ३ 'धि भाण्ड...' इति मु० पा० ।
४ 'वेशः' इति मु० पा० ।
५ 'तु नो कदाचिद्द्विगुणार्थप्रार्थने कृतोऽन्यायः' इति मु० पा० ।
६ 'केरलि' इति मु० पा० । ७ मुद्रितपुस्तके न दृश्यते ।
८ 'सुरचितरागोपचिते' इति मु० पा० ।

विस्रम्भकथाः श्रुट[1]खन्विचरन्नुद्यानवेदिकापृष्ठे ।
सहचरकरसक्तकरः सुन्दरसेनः किल[2] कदाचित् ॥ ४०५ ॥
स्थूलघनतन्तुसंतति[3]तानिततनानाम्बरावरणम् ।
यष्टिप्रान्तनियंत्रितदलवृन्तककुतुपतुम्बिक[4]कटित्रम् ॥ ४०६ ॥
त्रुटितचरणत्रसंगतसंस्फुटिताभ्यक्तपादमलिनतनुम् ।
त्वरितगतिलेखवाहकमारादायान्तमद्राक्षीत् ॥ ४०७ ॥
(विशे[5]षकम्)

प्रत्यासन्नीभूतं क्रमेण पौरन्दरिः परिज्ञाय ।
साकूतमना ऊचे वयस्य हनुमानयं प्राप्तः ॥ ४०८ ॥
अवनितललीनशिरसा कृतनतिना तेन विनिहितं भूमौ ।
उत्क्षिप्य झटिति लेखं सु[6]न्दरसेनस्तु वाचयामास ॥ ४०९ ॥
"स्वस्तिश्रीकुसुमपुरात्पुरंदरः सुन्दरं समभिधत्ते ।
अन्तर्जृम्भितशोकयस्तोऽवि[7]स्पष्टवर्णपदम् ॥ ४१० ॥
कुलमकलंकं न गणितमवधीरितमग्रजन्मनां चरि[8]तम् ।
नापेक्षितमवगीतं शठसेवितवर्त्मनि त्वया पतता ॥ ४११ ॥
वंशेऽकुटिलगतीनां द्विजिह्वतादोषरहितचरितानाम् ।
अपरविनाशरतानामुत्पन्नः कथमसि भुजङ्गः ॥ ४१२ ॥
क्व पुरोडाशपवित्रितवेदपदोद्गारगर्भवदनं ते
क्व च मदिरासववासितवारवधूमुखरसास्वादः ॥ ४१३

१ 'कुर्म' इति मु० पा० । २ 'कदाचित्तु' इति ब० पा० ।
३ 'तोलिततूला' इति मु० पा० । ४ 'प्रायम्' इति ब० पा० ।
५ 'कुलकम्' इति मु० पा० । ६ 'सुन्दर इति' इति ब० पा० ।
७ 'प्रस्तावि ...' इति मु० पा० । ८ 'सुचितम्' इति मु० पा० ।

क्व कुशविपाटनजन्मा सहसोदितवेदनाचमत्कारः ।
क्व च दासीरतसंगरनिर्दयनखरक्षतिः प्रीत्यै ॥ ४१४ ॥
क्व त्रेतानलधूमक्षोभितनयनाम्बुधौतवदनत्वम् ।
क्व च गणिकानिर्भर्त्सनशोकभरायातबाष्पसलिलौघः ॥ ४१५ ॥
क्व वषट्कारध्वानः षट्[1]कर्मविभूषणं श्रवणपूरः ।
क्व च साधारणवनितारतिमरणितश्रवणौत्सुक्यम् ॥ ४१६ ॥
क्वाचार्यप्रतनुलताताडनसंक्षोभसम्भवः कम्पः ।
क्व च कुपितवारललनानिष्ठुरपादप्रहारविषहित्वम् ॥ ४१७ ॥
क्व हरिणचर्मावरणं स्मृतिशास्त्रनिवेदितं व्रतं च[2]रतः ।
क्व च पण्यस्त्रीगात्रस्पृष्टाम्बरधारणेषु बहुमानः ॥ ४१८ ॥
समिधामेव च्छेदनमभ्यस्तं शैशवात्समारभ्य ।
शठवनिताधरखण्डन उत्पन्नं कौशलं कुतो भवतः ॥ ४१९ ॥
शुश्रूषणमेव गुरोः परिशीलितमचलचेतसा सततम् ।
कुटिलमतयो भुजिष्याः कथं त्वयाराधिताः निपुण[4]म् ॥ ४२० ॥
आम्नायपाठ एव स्फुटतरपदसौष्ठवं तव ख्यातम् ।
प्रकुपितवेश्यानुनये क्व शिक्षितं वचनचातुर्यम् ॥ ४२१ ॥
अथवा किं क्रियतेऽस्मिन्नवदातकुलेऽपि लब्धजन्मानः ।
स[5]द्संस्तुता भवंति प्रागुपचितकर्मदोषेण ॥ ४२२ ॥

---

१ 'सत्कर्मविभूषणश्रवणपूरः' इति मु० पा० । २ 'रणित' इति ब० पा० ।
३ 'भवतः' इति ब० पा० । ४ 'णाः' इति मु० पा० ।
५ 'वद' इति ब० पा० ।

त्वयि विनिवेश्य कुटुम्बं परलोकहितार्जनैकविहितात्मा[1]।
स्थास्यामीति समीहितमनुदिवसं तद्विसंवदितम्" ॥ ४२३ ॥
इत्यवगतलेखार्थे सुन्दरसेने विधेयपरिमूढे।
आर्यामगायदन्यः स्वावसरे [2]नीतिपरिकरिताम् ॥ ४२४ ॥
'विषयतिमिरावृतानामवटे पतताम दृष्टमार्गाणाम्।
पुंसां गुरुजनवचनद्रव्यशलाकांजनं शरणम्' ॥ ४२५ ॥
उद्वेजयति तदात्वे सुखसंवि[3]त्तिं करोति परिणामे।
कटुकौषधप्रयोगो गुरुनिगदितकार्यनिष्ठुरं च[4] वचः ॥ ४२६ ॥
लब्ध्वा वचसोऽवसरं मित्रमवादीत्पुरंदरापत्यम्।
पुनरपि नहि खिद्यन्ते प्रियजनहितभाषणे सन्तः ॥ ४२७ ॥
अगणितसहचरवचसो दुर्व्यसनमहाब्धिमग्नवपुषस्ते।
मन्युव्यथितस्य पितुर्यदि परमवलम्बनं वचनम् ॥ ४२८ ॥
निजवंशदीपभूतः कृतचरितालंकृतो महासत्त्वः।
सुन्दर सम्प्रति तातः स्पृष्टो दुष्पुत्रदोषेण ॥ ४२९ ॥
पुत्राभावः श्रेया[5]न्दुःसुतता पुत्रिणः कुलीनस्य।
अंतस्तापयति भृशं सचरितकथाप्रसंगेषु[6] ॥ ४३० ॥
सांव्यवहारिक[7] एष प्रायो लोके [8]गुणोन्नता नियताः।
येन तु सुतेन जननी वन्ध्यालं श्लाघते स पापीयान् ॥ ४३१ ॥

---

१ 'स्थः' इति मु॰ पा॰। २ 'गीतिपरिकलिताम्' इति मु॰ पा॰।
३ 'संवृद्धिं' इति मु॰ पा॰। ४ 'वचनम्' इति मु॰ पा॰।
५ 'न कुसु...' इति मु॰ पा॰। ६ 'षा' इति मु॰ पा॰।
७ 'त' इति मु॰ पा॰। ८ 'गुणः सुखानियतः' इति मु॰ पा॰।

विफलं शास्त्रज्ञानं गुरुगृहसेवापि नोपकाराय।
विषय[1]वशीकृतमनसो न्याय्यं पन्थानमुत्सृजतः॥ ४३१॥
जीवन्नेव मृतोऽसौ यस्य जनो वीक्ष्य वदनमन्योन्यम्।
कृतमुखभङ्गो दूरात्करोति निर्देशमंगुल्या॥ ४३२॥
नोप[2]निहन्तुं विषयाः शक्याः सत्यं तथापि निपुणधियः।
अभिधेयतां न गच्छन्त्यपवादविशेषिताभिधानस्य॥ ४३४॥
गुरुपरिचर्या जाया गुणोन्नता स्निग्धबन्धुसंपर्कः।
ब्राह्मे कर्मणि सक्तिर्लोकद्वयसाधनं सुधियाम्॥ ४३५॥
सुलभा तस्य विभूतिस्तस्य गुणा यान्ति जगति विस्तारम्।
बहु मनुते तं सुजनस्तस्मै स्पृहयंति बान्धवाः सततम्॥ ४३६॥
नासादयति स[4] एकः सत्सेवितमार्गतः परिस्खलनम्।
मण्डयति सो[5]ऽन्ववायं स निवासः शर्मणामशेषाणाम्॥ ४३७॥
स भवति विनयाधारो युक्तायुक्ते विवेकिता तस्य।
वृद्धोपदेशवाचः श्रवणोदर[6]तर्पणं सदा यस्य॥ ४३८॥
(विशे[7]षकम्)
प्राक्तनकर्मविपाकः क्षुद्रासु शरीरिणां यदासक्तिः।
आयतनं तु सुखानां संसारभुवां कुलोद्गता दाराः॥ ४३९॥
निर्विण्णे निर्विण्णा मुदिते मुदिता समाकुलाकुलिते।
प्रतिबिम्बसमा कान्ता संक्रुद्धे केवलं भीता॥ ४४०॥

१ 'नियति' इति मु० पा०। २ 'नो परिहर्तुं' इति ब० पा०
३ 'कुलोद्गता' इति मु० पा०। ४ 'य' इति मु० पा०।
५ 'सान्ववायं' इति मु० पा०। ६ 'पूरणं' इति मु० पा०।
७ 'युग्मम्' इति मु० पा०।

यावद्दाञ्छितसुरतव्यायामसहाऽविरुद्धसं[1]पर्का ।
चित्तानुवृत्तिकुशला पुण्यवतामेव जायते जाया ॥ ४४१ ॥
सद्भावप्रेमरसं वलयावलिशब्दशंकिता निभृतम् ।
विदधानाङ्गसमर्पणमुन्मीलितकुसुमसायकाकूता ॥ ४४२ ॥
हा हा किमुद्धतत्वं श्रोष्यति कश्चिद्गतत्रप स्वैरम् ।
निकटे परिवारजनो विस्मृत एव स्मरातुरस्य तव ॥ ४४३ ॥
इति कूँकृतिसंवलितैरायासनिवेदितार्थपदवाक्यैः ।
द्विगुणीकरोति कुलजा नायककर्माणि मोहनप्रसरे ॥ ४४४ ॥
इत्थमुदीरितवाचं सुहृदमवोचत्पुरंदरस्य सुतः ।
समुपस्थितजीवसमावियोगभयकंपितो वचनम् ॥ ४४५ ॥
तातादेशेऽलंघ्ये हारलताविरहपावके तीव्रे ।
विधिवशवर्तिनि मरणे नो विद्मः कार्यपरिणामम् ॥ ४४६ ॥
अनपेक्षितधनलाभां स्नेहैकनिबद्धमानसां दयिताम् ।
दैवाहृष्टो मुंचति घटितो वा लोहवज्रकणिकाभिः ॥ ४४७ ॥
अथ कृतगमनविनिश्चितिरभिमतरामां चकार विदितार्थाम् ।
सापि तमनुवव्राज प्रस्तुतयात्रं शुचाकुलिता ॥ ४४८ ॥
आसाद्य वटस्य तलं वाष्पपयःकणचिताक्षिपक्ष्माग्राम् ।
विघ्नितचरणविहारो हारलतामभिदधाति स्म ॥ ४४९ ॥
आ चीरवतो वृक्षाद्दा सलिलाद्वा प्रिये प्रियं यान्तम् ।
अनुयायादिति वचनं तेन त्वमितो निवर्तस्व ॥ ४५० ॥

---

[1] 'संयोगा' इति व० पा० ।

किं कुर्मो दैवहताः प्रभवति यस्मिन्कृशोदरि प्रसभम् ।
प्रेमग्रन्थिच्छेत्ता गुरुशासनसायको निरावरणः ॥ ४५१ ॥

न द्रविणचयप्राप्तिर्नैकाश्रयपरिचयो न च द्विगुणः ।
न स्वामिसमादेशो नाकारविलोभनं न वा ख्यातिः ॥ ४५२ ॥

हेतुस्तव प्रवृत्तेरस्मासु तथापि दैववशात् ।
ईदृक् कोऽप्यनुबन्धो यस्य विपाकोऽप्रतीकारः ॥ ४५३ ॥

(मन्दानितकम्)

परुषं यदभिहितासि प्रणयरुषा शंकिते[1] न नर्मणि वा ।
सुदति न तत्स्मरणीयं दुर्भाषणकीर्तनोद्वाते ॥ ४५४ ॥

तव हृदये हृदयमिदं विन्यस्तं न्यासपालनं कष्टम् ।
यत्नात्तथा विधेयं स्थानभ्रंशो यथा न स्यात् ॥ ४५५ ॥

अथ विरतवचोदयितं वाष्पभराक्लिष्टवर्णपदयोगा[2]त् ।
इति कथमपि हारलता संमूर्छितव[3]र्णभारतीमूचे ॥ ४५६ ॥

अविशुद्धकुलोत्पन्ना देहार्पणजीविका शठाचरणा ।
क्वाहं रूपाजीवा क्व भवन्तः श्लाघनीयजन्मगुणाः ॥ ४५७ ।

यत्तु[4] विषयविलोकनकुतूहलाभ्या[5]गतेन विश्रान्तम् ।
इयतो दिवसानस्मिंस्तन्मम परजन्म[6]सुकृतफलम् ॥ ४५८ ॥

गुरुसेवां बन्धुजनं स्वदेशवसतिं कलत्रमनुकूलम् ।
अनुषङ्गदृ[7]ष्टिपरिचित आस्थां प्रविधाय कः परित्यजति ॥ ४५९ ॥

---

१ 'त च' इति ब० पा० । २ 'गम्' इति मु० पा० ।
३ 'वस्तु' इति ब० पा० । ४ 'यत्त्वं' इति मु० पा० ।
५ 'दागतोऽसि विश्रान्तः' इति मु० पा० । ६ 'कृतशुभस्य फलम्' इति ब० पा० ।
७ 'दृष्ट' इति मु० पा० ।

यौवनचापलमेतद्यन्मादृशि भवति कौतुकं भवताम् ।
यत्तु सुखमनवगीतं तस्य स्थानं निजा दाराः ॥ ४६० ॥
ते मधुराः परिहासास्ता वक्रगिरः स वामताभ्रमयः ।
नो हृदये कर्तव्यो रहसि चेमार्थिना भवता ॥ ४६१ ॥
लाघवतो [1]यन्मनसः प्रणयाद्वा यत्तवाचरितम् ।
प्रतिकूलं तत्र मया नाथांजलिरेष विरचितो मूर्ध्नि ॥ ४६२ ॥
दुःसंचारा मार्गा दूरे वसतिर्विसंष्ठुलं हृदयम् ।
गुणपालित तव सुहृदा भवितव्यमतोऽप्रमत्तेन ॥ ४६३ ॥
हृदयद्वय एकत्वं याते यूनोर्वियोगजं क्लेशम् ।
अनुभवतोरपरेण प्रसंगतः पठ्यते पथ्या ॥ ४६४ ॥
'अन्योन्यगू[2]ढचेष्टितसद्भावस्नेहपाशबद्धस्य ।
विच्छेदकरो [3]मृत्युर्धीराणां वा परिच्छेदः' ॥ ४६५ ॥
अथ तच्छ्रवणानन्तरमा[4]स्स्व सुखं दयितिके व्रजामीति ।
अभिधाय याति [5]मन्दं सुन्दरसेने विवर्तितग्रीवम् ॥ ४६६ ॥
वटशाखालम्बिभुजां श्वसितोष्णसमीरशुष्यदधरदलाम्[6] ।
पर्यस्तां बिभ्राणां तन्मार्गविलोकनानिमेषदृशम् ॥ ४६७ ॥
[7]दोलायमानवे[8]णीं तिर्यग्गतकण्ठभूषणविशेषाम् ।

---

१ 'यन्मत्ततः प्रणयाद्वा साधु यन्नवाचरितम्' इति मु० पा० ।
२ 'सुदृढ' इति ब० पा० ।
३ 'करोम्ये ...' इति मु० पा० ।
४ 'मस्निग्धं' इति मु० पा० ।
५ 'सुन्दरसेनेऽपि' इति मु० पा० ।
६ 'मुखीम्' इति ब० पा० ।
७ 'लोला' इति मु० पा० ।
८ 'वेणीतिर्यक्कृत ...' इति मु० पा० ।

गलदश्रुवारिपूर्णां पति[1]तांशुकभागनि:सहांगलताम् ॥ ४६८ ॥
रुन्धानामिव हृदयं स्फुटदितरकरेण कुचयुगाश्रयिणा ।
परिशो[2]षितां विलासैरुत्सृष्टां जीवलोककर्तव्यैः ॥ ४६९ ॥
अंगीकृतां विपत्त्या वशीकृतां मर्मघट्टनैर्विषमैः ।
हारलतामपरि[3]स्फुटमंत:परिकथ्यमाणभारत्या ॥ ४७० ॥
मा मा तावद्यात क्षणमेकं यावदेष निष्करुणः ।
वनगुल्मैर्न तिरोहित इत्यभिदधतीं जडः प्राणाः ॥ ४७१ ॥

(कुलकम्)

अथ पश्चा[4]त्समुपेतं पप्रच्छ पुरंदरात्मजः पथिकम् ।
दृष्टा शोकव्यथिता विवर्तमाना वराङ्गना भवता ॥ ४७२ ॥
स उवाच वटतरोरध उर्व्यां पतिता विनिश्चलावयवा ।
तिष्ठति वनिता नान्या नयनावसरं गतास्माकम् ॥ ४७३ ॥
इति तद्वचनाश्म[5]हतो विक्लमूर्तिः पपात भूपृष्ठे ।
उत्थापितश्च सुहृदा सोऽभिदधे तेन शोकविकलेन ॥ ४७४ ॥
भवतु कृतार्थस्तातस्त्वमपि सुमित्रा[6]स्त्व संप्रति प्रीतः ।
समकालमेव मुक्ता पापेन मयासुभिश्च हारलता ॥ ४७५ ॥
हा हा हाव हतोसि ध्वस्ता लीला विलास किं कुरुषे ।
उच्छिन्ना विच्छित्तिर्भ्रम विभ्रम दश दिशो निराधारः ॥ ४७६ ॥

---

१ 'पतितां संशुष्कनिः ...' इति मु० पा० ।
२ 'परिशोषितां' इति ब० पा० ।
३ 'मपि रिक्ता' इति मु० पा० ।
४ 'वर्त्मनि' इति मु० प० ।
५ 'स्त' इति मु० पा० ।
६ 'च सांप्रतं' इति मु० पा० ।

किलकिंचित गच्छ वनं मोट्टायितमशरणत्वमुपयातम् ।
कुट्टमित प्रव्रज्यां गृहाण बिब्बोक विश भुवो विवरम् ॥ ४७७ ॥
ललितमनाथीभूतं विच्छतस्य गतिर्न विद्यते क्वापि ।
शशधरबिम्बद्युतिमुषि याताथामन्त[1]कांतिकं तस्याम् ॥ ४७८ ॥
(विशेष[2]कम्)

विनिवृत्त्य यामि दग्धुं मन्दिरहान्यकवल्लभप्राणाम् ।
भवतु वराक्यास्तस्याः सम्प्रार्चिर्दानमात्रमुपकारः ॥ ४७९ ॥
गत्वाथ तमुद्देशं यस्मिन्त्सा पंचभावमापन्ना ।
विललाप मुक्त[3]कण्ठं विलुठन्भुवि सहचरेण धृतमूर्तिः ॥ ४८० ॥
एते वयं निवृत्ता मुंच रुषं देहि कोपने वाचम् ।
उत्तिष्ठ किमिति तिष्ठसि भूमितले रेणुरूषितशरीरा ॥ ४८१ ॥
विनिमील्य दृशौ कस्मादप्रतिपत्त्या स्थितासि शुभवदने ।
[4]त्वद्वारितगमनविधेरपराधितया न मेऽस्ति संयोगः ॥ ४८२ ॥
नाकाधिपतिपुर[5]स्त्रीरभिभवितुं त्वयि दिवं प्रयातायाम् ।
सत्स्वपि शरेषु पंचसु निरायुधः साम्प्रतं मदनः ॥ ४८३ ॥
वंचकवृत्ता वेश्या इत्यपवादो जनेषु यो रूढः ।
अपनीतोऽसौ निपुणं त्वया प्रिये जीवमोचेण ॥ ४८४ ॥
वर्ण्यः सद्भूत एकस्त्रिपुरान्तकनन्दनो महासेनः ।
हृदयं यस्य [6]स्पृष्टं न मनागपि वामलोचनाप्रेम्णा ॥ ४८५ ॥

---

१ 'कस्यांत' इति मु० पा० ।
२ मुद्रितपुस्तके नास्ति ।
३ 'नादं' इति ब० पा० ।
४ 'त्वद्वारित' इति मु० पा० ।
५ 'पुरंध्री' इति ब० पा० ।
६ 'स्पष्टम्' इति मु० पा० ।

मन्येऽभीष्टवियोगं निमेषमपि दुःसहं सम[1]वधार्य ।
हरिणा वक्षसि लक्ष्मीर्विधृता गौरी हरेण देहार्धे ॥ ४८६ ॥
अयि लोकपाल सा भुवि ललामभूता त्वया विना शून्यम् ।
विश्वमिति किं न चिंतितमात्मस्थानं प्रियां नयता ॥ ४८७ ॥
भगवन्हुतवह मा मा लावण्यसमुद्रसारमुद्धृत्य ।
कथमपि विहितां धात्रा धक्ष्यस्येनां जगद्भूषाम् ॥ ४८८ ॥
इति विलपन्तं बहुविधमवधीर्य सुहृत्पुरंदरस्य सुतम् ।
काष्ठैर्विरचय्य चितां तामकरोदग्निसाद्गणिकाम् ॥ ४८९ ॥
तस्मिन्निद्धहुताशनविनिपतने कृतमतौ शुचा कलिते ।
मनसि स्फुरितामार्यां पपाठ कश्चित्प्रसङ्गेन ॥ ४९० ॥
'अनुमरणे व्यवसाय स्त्रीधर्मे कः करोति सविवेकः ।
संसारमुक्त्युपायं दण्डग्रहण व्रतं हित्वा' ॥ ४९१ ॥
श्रुत्वा सुन्दरसेन सु[2]हृदमवोचद्व्यपेतवैक्लव्यः ।
प्रतिबोधितं मनो मे धीरेणानेन युक्तमुपदिशता ॥ ४९२ ॥
क्षणदृष्टनष्टवल्लभजन्मजराव्याधिमरणपरिभूते ।
परिवर्तिनि[3] संसारे कः कुर्यादाग्रहं सहिमान्[4] ॥ ४९३ ॥
यातु भवान्कुसुमपुरं वयमप्यन्याश्रमे समाश्रयणम् ।
अंगीकुर्मोऽविद्याप्रहाणसंसिद्धये विहितम्[5] ॥ ४९४ ॥
सोऽवददभिजातजनो बाल्यात्प्रभृति त्वया च न[6] विमुक्तः ।

१ 'समालोक्य' इति मु० पा० । २ 'सचिवम्' इति ब० पा० ।
३ 'आवर्तिनि' इति ब० पा० । ४ 'सुमतिः' इति ब० पा० ।
५ 'नियतम्' इति मु० पा० । ६ 'न मुक्तोऽस्मि' इति मु० पा० ।

संन्यसनबुद्धिमधुना[१] कथमुज्झति विषयनिस्पृहं सुहृदम् ॥ ४९५ ॥
एवमिति सोऽभिधाय स्थिरधृ[२]तिनियमैस्तपोधनैर्जुष्टम् ।
गुणपालितेन सहितः सुन्दरसेनो जगाम वनम् ॥ ४९६ ॥
एवं भवन्तु[३] वेश्याः स्वार्थैकरता[४] व्यपेतसद्भावाः ।
अभिलषितविषयसिद्धेः का हानिस्तदपि युष्माकम् ॥ ४९७ ॥
रमणहृदयानुवर्तनचतुरचतुःषष्टिकर्मकुशलानाम् ।
न स्पृशति तत्त्वचर्चा पण्यवधूनां विदग्धचेतांसि ॥ ४९८ ॥
वलितप्लुतचित्रगतिस्थितिवे[५]गैश्चोदनानुवृत्त्या च ।
रागस्पर्शेन विना विशति मनः सादिनां तुरगः ॥ ४९९ ॥
गन्धोऽपि कुतः प्रेम्णः परभृतहारीतमदृकपोतानाम् ।
उज्ज्वलयत्यसमेषु विरुतविशेषैस्तथापि ते यूनाम् ॥ ५०० ॥
आहितयुक्ताहार्यैः[६] सम्यक्सकलप्रयोगसम्पत्त्या ।
भावविहीनोऽपि नटः सामाजिकचित्तरंजनं कुरुते ॥ ५०१ ॥
येऽपि धनक्षयदोषं पश्यन्ति जडा विलासिनीश्लेषे[७] ।
प्रष्टव्यास्ते भवता किमक्षतकपिशपुष्यया दाराः ॥ ५०२ ॥
न च लाभ एक एव प्रवर्तने[८] कारणं मनुष्येषु ।
रागादयोऽपि[९] सन्ति वैशिकशास्त्रप्रणेतृभिः[१०] कथिताः ॥ ५०३ ॥

१ 'रधुना' इति मु० पा० ।
२ 'मति' इति मु० पा० ।
३ 'न्ति' इति मु० पा० ।
४ 'इशो' इति ब० पा० ।
५ 'बोधैः' इति मु० पा० ।
६ 'मुक्ता' इति मु० पा० ।
७ 'षैः' इति ब० पा० ।
८ 'प्रवर्तते' इति मु० पा० ।
९ 'सागादयोऽपि' इति मु० पा० ।
१० 'वैशेषिकशास्त्रवेदिभिः' इति मु० पा० ।

का वा विभूतिराप्ता सुन्दरसेनाश्रया तपस्विन्या ।
यद्विरहकुलिशभिन्ना[1] मुमोच सा जीवितं क्षणार्धेन ॥ ५०४ ॥
उत्तमतरुणप्रकृतिः पुलकादिकसूचिता[2]यतनुसक्तिः ।
स्फुटसंनिहितविभावो निवार्यते केन शृंगारः ॥ ५०५ ॥
अन्तःकरणविकारं गुरुपरिजनसंकटेऽपि कुलटानाम् ।
जानंति तदभियुक्ता भ्रूभंगापांगमधुरदृष्टेन ॥ ५०६ ॥
अन्या विहाय पतिगृहमविचिंतितकुलकलङ्कजनगर्हाः[3] ।
रागोपरक्तहृदया यान्ति दिगन्तं मनुष्य[4] आसज्य ॥ ५०७ ॥
अपमानः पतिविहितो गुरुपरिकरतीव्रता गृहे दौःस्थ्यम् ।
शीलक्षतये यासां तासामतिरागतोऽन्यनरसक्तिः ॥ ५०८ ॥
या अप्यचलितवृत्ता भर्तृस्मरणाञ्जतत्पराः प्रमदाः ।
ता अपि रागविमुक्तास्तिष्ठन्त्यौचित्यमात्रेण ॥ ५०९ ॥
त[5]स्मात्तास्वभिगमनं विविधनिमित्तं नि[6]वार्यते केन ।
निजपरपण्यस्त्रीणां रागाधीनं तु हृदयनिर्वहणम् ॥ ५१० ॥
एवंविधदृष्टान्तैरुपपत्तियुतैस्तथैदृशैर्वाक्यैः ।
अन्यैरपि चाटुपदैरावर्जितमानसो[7] गम्यः ॥ ५११ ॥
विहितस्वाप[8]विबोधं किंचित्प्रक[9]टीकृतश्रमग्लान्या ।
उत्पादितजृम्भिकया परिरभ्य घनं निशापगमे ॥ ५१२ ॥

१ 'सा' इति ब० पा० ।
२ 'तर' इति मु० पा० ।
३ 'गेहाः' इति मु० पा० ।
४ 'प्यलाभाय' इति मु० पा० ।
५ 'तस्मादात्माभिगमनविविधनिमित्तं' इति मु० पा० ।
६ 'विधार्यते' इति मु० पा ।
७ 'सं गम्यम्' इति मु० पा० ।
८ 'रबोधं' इति मु० पा० ।
९ 'प्रकटीकृतश्रम दाक्ष्यात्' इति मु० पा० ।

विघटितपुट[1]मुद्रदृशा विलोक्य ककुभः [2]सदीर्घनिःश्वासम् ।
वक्तव्यमिति भवत्या 'रजनि खले किं प्रभा[3]तासि' ॥ ५१३ ॥

( विशेष[4]कम् )

अबला विषहेत कथं दृढशक्तिममुष्य रतिरसप्रसरम् ।
मदनज[5]नितानुरागो न विदध्याद्यदि बलाधानम् ॥ ५१४ ॥

धन्या [6]चक्राह्ववधूः प्रियतमसंघट्टनसमयमप्राप्य
शशिना वियुज्यमाना कुमु[7]द्वति क्षीणपुण्यासि ॥ ५१५ ॥

विकसितसुरभिमनोहरसंस्थानं सरसकुसुमसप्राशम् ।
न करोति तथा पीडामास्वादितविच्यु[8]तं यथा भृंग्याः ॥ ५१६ ॥

विज्ञापयाम्यतस्त्वां रचितांजलि[9]मौलिना विधाय नतिम् ।
परिचारकजनमध्ये गणनीयाहं प्रसादेन ॥ ५१७[10] ॥

अथ दीपितरागांगैरपहस्तितला[11]भदिक्क्रमोपचितैः ।
मृदुभिश्चित्ता[12]नुगतैरुपचारैः पातितस्य विश्वासे ॥ ५१८ ॥

अवलोकितोऽसि लम्पट किमिति वदन्कर्णसंनिधौ निभृ[13]तम् ।
संकटसेनाधाम्ना अद्य मया जालमार्गेण ॥ ५१९ ॥

मालत्या सह के[14]लिं विदधासि सखी ममेति न विरोधः ।
यत्तु चिरं स्निग्धदृशा पश्यसि तां तत्र मे शङ्का ॥ ५२० ॥

---

१ 'विनिमुद्र' इति मु० पा० । २ 'सु' इति मु० पा० ।
३ 'प्रयातासि' इति ब० पा० । ४ मुद्रितपुस्तके नास्ति ।
५ 'तुलिता' इति मु०पा० । ६ 'चक्राह्ववधूप्रिय ...' इति मु० पा० ।
७ 'कुमुदिनि' इति मु० पा० । ८ 'ति यथा भृग.' इति मु० पा० ।
९ 'माविधाय' इति मु० पा० । १० मुद्रितपुस्तके एतच्छ्लोकान्ते युग्ममिति दृश्यते
११ 'मार्गसंभ्र' इति मु० पा० । १२ 'चा' इति मु० पा० ।
१३ 'य' इति मु० पा० । १४ 'किंचिदभिदधासि सखे' इति मु० पा० ।

त्वामागता न वीचिततुमनुबध्य न याचितः प्रयत्नेन।
आहूय वद किमर्थं ताम्बूलं ग्राहिता कमलदेवी॥ ५११॥

कंचुकमपकर्षन्त्याः प्रकटीभव[1]दंसकचकुचपार्श्वम्।
साभिनिवेशं दृष्टं भवता किं कुन्दमालायाः॥ ५२२॥

परिहासेन गृहीता यद्यंशुकपल्लवे त्वया रामा।
आच्छा[2]द्यापक्रान्ता किं मा[3]मवलोक्य पृष्ठतः सहसा॥ ५२३॥

विज्ञानेन ख्यातां कुसुमलतां त्वं तु वर्णयस्यनिशम्।
नृत्यंतीं मृगदेवीं विस्फारितलोचनः पश्यन्॥ ५२४॥

कारणमत्र न वेद्म्यहमृजुपन्थानं प्रसिद्धमुत्सृज्य।
वक्रेण यदेषि [4]पथा माधवसेनागृहाग्रेण॥ ५२५।

इति सेर्ष्योपन्यासैरन्यैश्चामर्मवेधिलघुकोपैः।
प्रणयप्रभवैर्विदि[5]ते ज्ञातोदरि गूढरागत्वे॥ ५२६॥

अतिविश्रयेऽन्तरिततनुर्जनितस्थितिरायताच्चि सह मात्रा।
परुषगिरा त्वं कुर्या इत्थ मिथ्यावचःकलहम्॥ ५२७॥

(अंतः कुलकम्)

अक्लेशोपनतधनः प्रेमप्रह्वो निरर्गलत्यागः।
भट्ट[6]महानन्दसुतो निधिभूतोऽभव्यया त्वया त्यक्तः॥ ५२८॥

व्यसनोपहतविवेको दे[7]वैकगतिः स्वदारविद्वेषी।
मामविगणय्य मूढे निर्भर्त्सित एव केशवस्वामी॥ ५२९॥

१ 'दङ्गकुचपार्श्वम्' इति मु॰ पा॰। २ 'च्छि' इति मु॰ पा॰।
३ 'त्वा' इति मु॰ पा॰। ४ 'सदा' इति मु॰ पा॰।
५ 'विच्छिते' इति मु॰पा॰। ६ 'भट्टानन्दस्य सुतो' इति मु॰ पा॰
७ 'दानैकरतिः' इति मु॰ पा॰।

अगणितराजापायोऽविच्छिन्नाय: स्वभावतस्त्यागी ।
किमु[1]पेक्षितोऽनुरक्तो वामधिया शौ[2]ल्किकाध्यक्ष: ॥ ५३० ॥
पितुरेक एव पुत्रस्तु[3]र्यवयसो गदाभिभूतस्य ।
द्रविणवत: प्रभुरातो निराकृतो भूरिकामया सोऽपि ॥ ५३१ ॥
स्वकरेण परित्यक्ता त्वया विभूति: करोमि किं पापा ।
सर्वभ[4]रेणोपनतं वसुदेवमनादरेण पश्यन्त्या ॥ ५३२ ॥
पुरुषान्तरसंघर्षात्प्रोत्साहितचित्तवृत्ति[5]निरपेक्षम् ।
वसु विसृजति यो रभसात्तस्य न वार्ता त्वया पृष्टा ॥ ५३३ ॥
चित्रादिकलाकुशल: स्मरशास्त्रविच[6]क्षणो वृषप्रकृति: ।
उपकुर्वन्नपि सर्वो विद्वेषिगणे त्वया क्षिप्त: ॥ ५३४ ॥
चन्द्रवतीमाभरणं दत्तं मधुसूदनस्य पुत्रेण ।
पश्यन्ती बिभ्राणामयि रागिणि किं न जि[7]ह्रेषि ॥ ५३५ ॥
ग्रामोत्पत्ति[8]रशेषा प्र[9]विशती सिंहराज[10]विनियोगात् ।
मन्मथसेनावासे[11] लघयति ते रूपसौभाग्यम् ॥ ५३६ ॥
आस्तामपरो लाभो नृप[12]वल्लभनन्दिसेनतनयेन ।
शिवदेव्या उपचार: क्रियते य[13]स्तेन पर्याप्तम् ॥ ५३७ ॥

---

१ 'स्वकरेण परित्यक्तो' इति मु० पा० ।
२ 'शौण्डिका' इति मु० पा० ।
३ 'तृतीय' इति मु० पा० ।
४ 'सरेणो' इयि ब० पा० ।
५ 'रतपेक्षम्' इति ब० पा० ।
६ 'विलक्षणो' इति मु० पा० ।
७ 'ह्रीतासि' इति मु० पा० ।
८ 'मशेषां' इति मु० पा० ।
९ 'पश्यन्ती' इति मु० पा० ।
१० 'ग' इति मु० पा० ।
११ 'सं' इति ब० पा० ।
१२ 'भट्टाधिप' इति मु० पा० ।
१३ 'यत्नेन' इति मु० पा० ।

पश्येदं धवलगृहं पाशुपताचार्यभावशुद्धेन ।
कारितमनंगदेव्या विभूषणं पत्तनस्य सकलस्य ॥ ५३८ ॥
आपणिकार्थस्य कुतो राजा लभते चतुर्थमपि भागम् ।
हट्टपतिरामसेनप्रसादतो नर्मदा यमुपभुंक्ते ॥ ५३९ ॥
पुंस्त्वाख्यापनकामो न स्त्री न पुमान्किल प्रभुस्वामी ।
अनुबध्नन्नुपहसितस्त्वया ज[1]डः स्वार्थमनपेक्ष्य ॥ ५४० ॥
वाजीकरणैकमतिर्नरनाथानुग्रहेण विख्यातः ।
प्रत्याख्यातः स तथा रविदेवः किंकरत्वमाकांक्षन् ॥ ५४१ ॥
किं कन्दर्पकुटुम्बे जातोऽसावुत वशीकरणयोगम् ।
क[3]मप्यवैति सिद्धं[4] येनाकृष्टासि सर्वभावेन ॥ ५४२ ॥
बाल्ये तावदयोग्या पश्चादपि वृद्धभावपरिभूता ।
तारुण्ये रागहृता यदि गणिका भ्रमतु तद्भिक्षाम् ॥ ५४३ ॥
उपनय भाण्डकमेतद्यदर्जितं मामकेन देहेन ।
विदधामि तीर्थयात्रामा[5]स्व सुखं प्रेयसा सार्धम् ॥ ५४४ ॥

( अन्तःकुलकम् )

आर्यजननिन्दितानां पापैकरसप्रकाश[6]नारीणाम् ।
एतावानेव गुणो यदभीष्टसमागमो निरावरणः ॥ ५४५ ॥

---

१ 'जड' इति ब० पा० । २ 'गात्' इति मु० पा० ।
३ 'काम —' इति मु० पा० । ४ 'सिद्धिं' इति मु० पा० ।
५ 'मा. स्व' इति मु० पा० । ६ 'अनेकनारीणाम्' इति मु० पा० ।

नो धनलाभो लाभो लाभः खलु वल्लभेन संयोगः ।
अचिरगताद्दर्शाग्निर्नभवति मनसः प्रमो[1]दाय ॥ ५४६ ॥
गाढानुरागभिन्नं तारुण्यरसा[2]मृतेन संसिक्तम् ।
न भजति मद्धृदयहृदयं विभवार्जनसम्भवा चिन्ता ॥ ५४७ ॥
लाभः स एव परमः पर्याप्तं तेन तेन तृप्तास्मि ।
विनिवेश्य यदुत्सङ्गे निक्षिपति मुखे [3]मुखेन ताम्बूलम् ॥ ५४८ ॥
सुरतश्रमवारिकणान्परिमार्ष्टि निजांशुकेन गात्रेषु ।
यदुरसि निधाय [4]विहसंस्तस्य न मूल्यं वसुन्धरा सकला ॥ ५४९ ॥
शिथिलितनिजदाररतिर्मयि सक्तमना अनन्यकर्तव्यः ।
यदसौ जितनलरूपस्तिरस्कृतं तेन गाणिक्यम् ॥ ५५० ॥
बहुकुसुमरसास्वादं कुर्वाणा मधुकरी[5] विधिनियोगात् ।
ईदृक्प्र[6]सवविशेषं लभते खलु येन भवति कृतकृत्या ॥ ५५१ ॥
अयि सरले तावदिमा उपदेशगिरो [7]विशंति कर्णांतः ।
यावन्नान्तर्भूतं तच्चेतसि मामकं चेतः ॥ ५५२ ॥
श्रीरस्तु दुर्गतिर्वा वेश्मनि वासो [8]महत्यरण्ये वा ।
स्वर्लोके नरके वा किं बहुना तेन मे सार्धम् ॥ ५५३ ॥
इदमास्तेऽलंकरणं दुर्जननि गृहाण किं ममैतेन ।
तेनैव भूषिताहं गुणनिधिना भट्टपुत्रेण ॥ ५५४ ॥

---

१ 'प्रसादाय' इति मु० पा० ।
२ 'सुखा' इति मु० पा० ।
३ 'स' इति मु० पा० ।
४ 'षिजांस्त' इति मु० पा० ।
५ 'मधुकरीव विधियोगात्' इति मु० पा० ।
६ 'पुरुष' इति मु० पा० ।
७ 'वसति' इति मु० पा० ।
८ 'वल' इति मु० पा० ।

उचितस्थाननियुक्तान्यपनीय विभूषणानि सावेगम् ।
एवमभिधाय यास्यसि मातुः पुरतः समुत्सृज्य ॥ ५५५ ॥
(कुल[1]कम्)

इति रागात्स[2] श्रुत्वा चेतसि कुरुते कदाचिदेवमिदम् ।
स्नेहाधिष्ठितमनसामवि[3]धेयं नास्ति नारीणाम् ॥ ५५६ ॥
जननीं जन्मस्थानं बान्धवलोकं वसूनि जीवं च ।
पुरुषविशेषासक्ताः सीमन्तिन्यस्तृणाय मन्यन्ते ॥ ५५७ ॥
रणशिरसि हते वज्रे वज्रोपमयंत्रनिर्गतग्रावणा ।
प्राणान्मुमोच दयिता न मंत्रविधिना [4]हृता रामा ॥ ५५८ ॥
कालवशेनायासीत्पंचत्वं दाक्षिणात्यमणिकंठः ।
प्रेमोपगता वेश्या तेनैव समं जगाम [5]भस्मत्वम् ॥ ५५९ ॥
भास्करवर्मणि याते सुरवसतिं वारितापि भूपतिना ।
तद्दुःखमसहमाना प्रविवेश विलासिनी दहनम् ॥ ५६० ॥
ज्वालाकरालकृतभुजि नग्नाचार्यः पपात नरसिंहः ।
तस्मिन्नेव शरीरं निजमजुहोच्छोकपीडिता वेश्या[6] ॥ ५६१ ॥
प्रीतिभराक्रान्तमतिस्त्रिदशालयजीविकां क्रमोपगताम् ।
अङ्गीचकार मुक्त्वा [7]जीहला मि[8]श्रपुत्रमा मृत्योः ॥ ५६२ ॥

---

१ हस्तपुस्तकद्वये नास्ति ।
२ 'रागांधः' इति ब० पा० ।
३ 'भि' इति ब० पा० ।
४ कृतानुयारामा इति मु० पा० ।
५ 'पंचत्वम्' इति मु० पा० ।
६ 'दासी' इति मु० पा ।
७ 'जीर्णा' इति मु० पा० ।
८ 'भट्ट' इति ब० पा० ।

देशान्तरादुपेता[१] प्रसादमात्रेण वीक्षिता वनिता ।
तत्याज न पादयुगं समरे निहतस्य वामदेवस्य ॥ ५६३ ॥
भट्टकदम्बकतनये याते वसतिं परेतनाथस्य ।
चक्रे देहत्यागं [२]रणदेवी वारयोषितां मुख्या । ५६४ ॥
अस्यामेव नगर्यां द्रविणमदात्कालसंचितमशेषम् ।
प्रेम्णाकृष्टा गणिका मिश्रा[३]त्मजनीलकंठाय ॥ ५६५ ॥
इयमपि [४]मयि विहितास्था मातृवचःश्रवणकलुषिता क्व गता ।
त्यक्ताभरणं सर्वं प्रविजृ[५]म्भितमन्युसंवेगा ॥ ५६६ ॥
उत्सृष्टालंकरणां परिशेषित[६]मातृमुक्तपरिवाराम् ।
सतर्पयामि संप्रति सर्वस्वेनापि हरिणाक्षीम् ॥ ५६७ ॥
गेहेन किं प्रयोजनमन्यैरपि बन्धुदारपरिवारैः ।
संसारग्रहकारणमेका खलु मालती मम हि ॥ ५६८ ॥
अमृतकरावयवैरिव घटिता सा[७] दृढतरं परिष्वज्य[८] ।
चेतो नयति समत्वं ब्रह्मण आनन्दरूपस्य ॥ ५६९ ॥
आविर्भवदात्मभवक्षोभक्षतधीरता[९] घनं रभसात् ।
विगलितकुचयुगलावृतिरालिंगति मालती धन्यम् ॥ ५७० ॥

१ 'देशान्तरादुपेते प्रसादमात्रेण वीक्षिते वनिते । पादयुगं तत्यजतुर्न नामदेवस्य समिति निहतस्या' इति ब० पा० ।
२ 'सहदेवी ' इति ब० पा० ।
३ 'भट्टात्मज' इति ब० पा० ।
४ 'विहितास्था मां मातृवचः कलुषिता क्व गता' इति मु० पा० ।
५ 'परिवर्धित' इति मु० पा० ।
६ 'मातरं विमु...' इति ब० पा० ।
७ 'या' इति मु० पा० ।
८ 'क्ता' इति मु० पा० ।
९ 'ताद्य क्षतरभसा' इति मु० पा० ।

निर्दयतरौष्ठखण्डनमन्मथहुँकारमूर्च्छितं सुरते ।
अहहेति वचस्तस्या अपुण्यभाजो न शृण्वंति ॥ ५७१ ॥
स्मृतिजन्मजनितविकृतिप्रततिच्छन्नं करोति संसारम् ।
आबद्धसुरतसंगरविमर्दसंक्षोभिता दयिता ॥ ५७२ ॥
गाढतराश्लिष्टवपुर्भजते कान्ता प्रमोदसंमोहम् ।
शिथिलीकृता तु किंचिद्विविधविकारं समुच्छ्वसिति ॥ ५७३ ॥
संत्यन्या अपि सत्यं पुरुषोचितकर्मपण्डिताः प्रमदाः[1] ।
सृष्टा[2] तया तु नियतं विपरीतरतक्रियागोष्ठी ॥ ५७४ ॥
तंत्रीवाद्यविशेषानु[3]ह्वामानन्यजन्मनस्तस्याः ।
कुहरितरेचितकम्पितसम्पादननैपुणं करोति ज[4]ङ्घान् ॥ ५७५ ॥
ललितांगहारजृम्भितवलितस्मितवेपनानि मालत्याः ।
पश्यञ्जहाति कामो रतिमोहनचेष्टितेषु बहुमानम् ॥ ५७६ ॥
न ग्राम्यं परिहसितं नाविभ्रमतरलितो[5]ऽक्षिविक्षेपः ।
सुर[6]तोद्योगनिरोधो दोहददानं न पुष्पबाणस्य ॥ ५७७ ॥
नार्थपरो लप[7]नरसो न पराशयवेदने विचक्षणता ।
नासौष्ठवं प्रसंगे[8]नोल्वणगुणकीर्तनेषु भारत्याः ॥ ५७८ ॥
नापरपुरुषश्लाघा न त्यागः कालदेशवेशस्य ।
वैदग्ध्यजन्मभूमेर्गुरुजघनभरेण मन्दयातायाः ॥ ५७९ ॥

( विशेषकम् )

---

१ 'वेश्याः' इति मु० पा० ।
२ 'दृष्टामया' इति मु० पा० ।
३ 'दु' इति मु० पा० ।
४ 'वजम्' इति मु० पा० ।
५ 'ताक्षि' इति मु० पा० ।
६ 'तानुद्योगविभौ' इति मु० पा० ।
७ 'नयन' इति मु० पा० ।
८ 'प्रसंगे न चान्यगुण...' इति मु० पा० ।

चक्राङ्कपरिष्वजनं हंस[1]समाश्लेषनकुलपरिरम्भम् ।
पारावतावगूहनमाचरति सुमध्यमा यथावसरम् ॥ ५८० ॥
तद्वक्रवचन[2]हास्यव्यवहृतिहृतमानसस्य जायन्ते ।
अनुकूलसुन्दरा अपि भरणीयाः केवलं दाराः । ५८१ ॥
सूचयति पृथक्करणं भ्रातॄणां वक्ति विषमशीलत्वम् ।
विवृणोति गृहविसंस्थामभिनन्दति पितृकुलस्य गुणवत्ताम् ॥ ५८२ ॥
अन्यसुतपक्षपातं कथयति मातुस्तिरस्करोति पतिम् ।
[3]पार्श्वनिमग्ना जाया मा यातु विमुच्य कार्मुकं मदनः ॥ ५८३ ॥

(युग[4]लकम्)

एवं कृतेऽपि सुन्दरि यदि तिष्ठति नायकः प्रकृत्यैव ।
इत्थं पथि परिमोषस्त्वत्सख्या नैपुणेन वक्तव्यः ॥ ५८४ ॥
गृहकार्यव्यग्रतया चित्तग्रहणाय वा कुलस्त्रीणाम् ।
नायाते भवति सखी प्रावृड्घनकलुषिते दिशां चक्रे ॥ ५८५ ॥
[5]ग्रीवकशयनगता स्फारीभवदात्मसम्भवविकारा ।
त्वद्वर्त्मनिहितनेत्रा गीतामन्येन गीतिकामशृणोत् ॥ ५८६ ॥

(युग[6]लकम्)

'यदि जीवितेन कृत्यं सम्भावय विरहिणि प्रियं तूर्णम् ।
घनरसितस्य हि पुरतः कदलीदलकोमलः कुलिशपातः ॥ ५८७ ॥

---

१ 'हंसस्याश्लेषं नकुलपरिरम्भम्' इति व० पा० । २ 'वदन' इति मु० पा० ।
३ 'पार्श्वनिमग्नां जायां मानयति विमुच्य कार्मुकं मदनः' इति मु० पा० ।
४ मुद्रितपुस्तके नास्ति । ५ 'प्राग्ग्रीवक' इति मु० पा० ।
६ मुद्रितपुस्तके न दृश्यते ।

आकर्ण्य मामवादीद्वन्यास्ता युवतयः सखि कठोराः ।
या विषहन्ते दीर्घप्रियतमविरहानलासारम् ॥ ५८८ ॥
मम तु दिनांतरितेऽपि प्रेयसि लब्ध्वा सहायसामग्रीम् ।
विदधाति मकरकेतन उत्कलिकाविधुरितं हृदयम् ॥ ५८९ ॥
उत्कण्ठयति [1]भृशं मां समीरणो बकुलकुसुम[2]गन्धाढ्यः ।
प्रच्यावयंति धैर्यान्मधुरध्वनिभिः कलापभृतः ॥ ५९० ॥
सतडिन्मिलद्बलाकामसिताम्बुधरावलीं समुद्यन्तीम् ।
उत्सहते सा नौचितुमविरलमालिंगितो यया कान्तः ॥ ५९१ ॥
स्वेच्छागमनलघुत्वं बहुलापायं निशासु पन्थानम् ।
न विचारयति महिला अभीष्टजनसंगतावुत्का: ॥ ५९२ ॥
क्रियतां भूषणशोभा त्वरयति से मानसं मनोजन्मा ।
रंजयति मनो नितरां कलधौतनिवेशितं रत्नम् ॥ ५९३ ॥
घनजलदावृतककुभि प्रदोषसमये प्रदोषगमनाय ।
विदधानया कुबुद्धिं रागान्धे किमिदमारब्धम् ॥ ५९४ ॥
वचनप्रपंचसार जायाश्रितमन्यदेशसम्बन्धम् ।
पुरुषमभिगन्तुकामा नवेयमभिसारिका दृष्टा ॥ ५९५ ॥
[3]जलधौततिलकरचनां गलदम्भोबिन्दुलुलितकेशान्ताम् ।
तिम्यत्तनुलीना[4]वृतिचण्डानिलसलिलपातकंटकिताम् ॥ ५९६ ॥
अविभावितसमविषमप्रस्खलदंघ्रिं सहायकरलग्नाम् ।
पुरतोऽध्वनः प्रमाणं मुहुर्मुहुः साध्वसेन पृच्छंतीम् ॥ ५९७ ॥

---

१ 'नितांतं' इति मु० पा० ।
२ 'सन्नाद्धः' इति मु० पा० ।
३ 'दर' इति ब० पा० ।
४ 'लीला' इति मु० पा० ।

अन्य[1]स्त्रीषु च पत्यौ व्यग्रे कृच्छ्रेण कथमपि प्राप्ताम् ।
तत्कालयोग्यपरिजननिवेदितामिति विक[2]ल्प्य सह सखिवैः ॥ ५९८ ॥
किं प्रेम्णोऽयं महिमा किमुतानंत्य[3] धनप्रलोभस्य ।
किं वाऽन्यतः प्रवृत्ता प्रवेशिता[4] वातवर्षेण ॥ ५९९ ॥
संनिहितकलत्राणामनुचितमिति बाह्यलोकसंवदनात् ।
अन्यस्मिन्नुदवसिते विसर्जितामिष्टमालतीकेन ॥ ६०० ॥
लोकेन हास्यमानां बिभ्राणां वाससी जलक्लिन्ने ।
रूपमदमुत्सृजन्तीं वैलक्ष्यादिहसितेन नतवदनाम् ॥ ६०१ ॥
पश्चात्तापगृहीतां कण्टकदर्भाग्रभिन्नपादतलाम् ।
अस्मद्वचः स्मरंतीं द्रक्ष्यंत्यभिसारिकां सुकर्माणः ॥ ६०२ ॥
इति परुषमभिदधानां मातरमवधीर्य युष्मदभ्याशम् ।
चौरहृतका व्रजन्तीं विद्राविता रक्षिणः सखीं मुमुषुः ॥ ६०३ ॥

(महाकुलकम्)

एषा प्रपंचरचना यदि भवति वृथा पुनः पुरस्तस्य ।
वणिगिदभ्युपेत्य वक्ष्यति सहायसंचोदितो भवतीम् ॥ ६०४ ॥
पूर्वं दत्तस्योपरि मुक्ताहारस्य केदरास्त्रिंशत् ।
परिचारिकया नीता अन्यानपि मृगयते [5]व्ययस्य कृते ॥ ६०५ ॥
यत्तु घनसारकुंकुमचन्दनधूपादिमुक्तकं दत्तम् ।
तत्सम्पुटके लिखितं शृणु पिण्डलिकां करोमि ते पुरतः ॥ ६०६ ॥

---

१ 'अन्यस्मित्प्रेमपतौ' इति ब० पा० । २ 'विकल्पसहस्रविधौ' इति मु० पा० ।
३ 'त्यंतं' इति मु० पा० । ४ 'पि' इति मु० पा० ।
५ 'वयस्य' इति मु० पा० ।

एतावन्तं कालं नाव[1]ष्टभ्यार्थिता मया त्वमसि ।
रिक्तं भाण्डस्थानं साम्प्रतमिति याचना क्रियते ॥ ६०७ ॥
एवंवादिनि तस्मिन्किंचिन्नज्जानता[2] चणं स्थित्वा ।
प्रियपूर्वं प्रश्रितया वाचा वाच्यः सवैलक्ष्यम् ॥ ६०८ ॥
हारस्तवैव तिष्ठतु मध्यस्थस्थापितेन मूल्येन ।
शेषं ततो यदन्यत्तद्दिवसैः पूरयिष्यामि ॥ ६०९ ॥
इयमपि कपटग्रथना [3]पूर्वसमा चेत्तदेदमभिधेयम् ।
आशंकन्तेऽनिष्टं कातरहृदया हि योषितः प्रायः ॥ ६१० ॥
अपटुशरीरे स्वामिनि विज्ञप्ता भगवती मया गत्वा ।
भवतु निरामयदेहो जीवितनाथस्तव प्रसादेन ॥ ६११ ॥
सम्पन्नवांछितार्था बल्युपहारेण पूजयिष्यामि ।
सामग्रीविरहेण तु न वितीर्णस्तत्र मे मनसि शंका ॥ ६१२ ॥

( विशेषकम् )

अस्मिन्व्यर्थीभूते रिक्तीकृत[4]शीर्णवेश्मनो दाहम् ।
उत्पाद्य मन्दगामिनि सर्वविनाशः प्रकाशमुप[5]नेयः ॥ ६१३ ॥
स्निग्धत्वमलं बुद्धा सहभोजनशयनवसनलिंगेन ।
एभिरुपायद्वारैर्वान्त[6]विरिक्तस्त्वया कार्यः ॥ ६१४ ॥
वार्धुषिककदर्थनया भोगध्वंसात्सहायवचनैर्वा ।
अवधारितेऽपि निपुणं वरगात्रि विलुप्तसारत्वे ॥ ६१५ ॥

---

१ 'नावसरेऽत्यर्थिता' इति मु॰ पा॰ ।
२ 'तेच्चणं दृष्ट्वा' इति मु॰ पा॰ ।
३ 'षण्डसमा' इति ब॰ पा॰ ।
४ 'शून्य' इति मु॰ पा॰ ।
५ 'न्नेयः' इति मु॰ पा॰ ।
६ 'नातिविरक्त' इति मु॰ पा॰ ।

पुरुषवचोनिर्धारणमा[1]यत्यामीहितोपघातीति ।
यत्नादमी विधेया गम्यस्य विमोक्षणोपायाः ॥ ६१६ ॥
पृथगासननिर्देशः प्रत्युत्थानादिकेऽपि शैथिल्यम् ।
सासूयसोपहासा आलापा मर्मवेधि परिहसितम् ॥ ६१७ ॥
तत्प्रतिपक्षश्लाघा तदधिकगुणरागकीर्तनावृत्तिः ।
वदति प्रिय आभीक्ष्णं[2] बहुप्रलापित्वदूषणाख्यानम् ॥ ६१८ ॥
वचनान्तरोपघातैस्तत्प्रस्तुतसंकथासमाक्षेपः ।
तद्व्यवहारजुगुप्सा सव्यपदेशस्तदंतिकत्यागः ॥ ६१९ ॥
व्याजेन कालहरणं स्वापावसरे विवर्तनं शयने ।
निद्राभिभव[3]ख्यापनमुद्वेगः संमुखीकरणे ॥ ६२० ॥
गुह्यस्पर्शनिरोधः स्वभावसंस्था[4]रताभियोगेषु ।
चुम्बति वदनविकम्पनमालिंगति कठिनगात्रसंकोचः ॥ ६२१ ॥
असहिष्णुत्वं प्रहणनकररुहदशनक्षतिप्रसंगेषु ।
दीर्घरते निर्वेदः स्वपिहीति [5]रताभियोजके भूयः ॥ ६२२ ॥
तदशक्तावनुबन्धो वैदग्ध्यवि[6]कासने तथा हासः ।
रात्र्यवसानस्पृहया पुनः पुनर्यामिकप्रश्नः ॥ ६२३ ॥
निःसरणं वासगृहादृषसि समुत्थाय तल्पतस्त्वरया ।
सरभसमुदीरयंत्या निशा प्रभाता प्रभातेति ॥ ६२४ ॥ (कुल[7]कम्)

१ 'वत्यासाक्षठोपघातीनि' इति मु० पा० । २ 'क्ष्ण' इति मु० पा ।
३ 'ख्या' इति मु० पा । ४ 'पनानुयोगेषु' इति मु० पा० ।
५ 'वचो' इति ब० पा० । ६ 'नाशने' इति मु० पा० ।
७ मुद्रितपुस्तके नास्ति ।

उभयेच्छया प्रवृत्तं निरुपाधि प्रेम भवति रमणीयम्।
अन्योन्यसमासक्तौ संस्थानमिवाभिजातमणिहेम्नोः॥ ६२५॥
यस्त्वेकाश्रयरागः परिभवदौर्बल्यदैन्यनाशानाम्।
स निदान[1]मसन्दिग्धं मौतां प्रति दग्धमुखस्येव। ६२६॥
यानि हरन्ति मनांसि [2]स्मितवीचितजल्पितानि रक्तानाम्।
तानीव विरक्तानां प्रतिभांति विवर्तनानीव॥ ६२७॥
विदधातु किमपि कथमपि निगृह्यमाणा मुहूर्तमासिथ्ये।
इति यत्र व[3]चः स्त्रीणां तत्रापि रमंत एव पशुतुल्याः॥ ६२८॥
यत्र न मदनविकाराः सद्भावसमर्पणं न गात्राणाम्।
तस्मिन्मुद्रितभावे पशुकर्मणि पशव एव रज्यंते॥ ६२९॥
अवधीरणयोपहतः प्रतिदिवसं क्षीयमानसद्भावः।
अभिमानवान्मनुष्यो योषितमूढामपि त्यजति॥ ६३०॥
साचिनिकोचं सख्याः पाणितलं पाणिना समाहत्य।
यन्नरमुपहसति स्त्री ददातु तस्मै सही रस्नम्॥ ६३१॥
पुरुषान्तरगुणकीर्तनमन्योद्देशेन चात्मनो निन्दाम्।
शृण्वन्नपि यः स्वस्थः स्वस्थोऽसौ कालपाशबद्धोऽपि॥ ६३२॥
अवगम्याभिप्रायं स्वामिन्याः परिजनोऽपि यं पुरुषम्।
अवहसति तिरस्कार्यं तस्य न मूल्यं वराटिकाः पंच॥ ६३३॥
तत्त्वातत्त्वसमुत्थव्यवहृत्योर्योऽन्तरं न जानाति।
स्थानं भवति स पशुपतिरपसंशयमर्धचन्द्रलाभस्य॥ ६३४॥

---

१ 'स' इति मु॰ पा॰। २ 'च ललितस्मितवीचितानि' इति मु॰ पा॰।
३ 'मन' इति मु॰ पा॰।

क्रमलङ्घितगौरवांशो रिक्ततया लाघवं परापतितः।
अप्राप्तपरिच्छेदः प्लवतेऽसौ युवतिसरिति कुमनुष्यः॥ ६३५॥
यत्नेन कपटघटितान् शृंगारोद्दीपनार्थमनुभावान्।
रतिशिल्पजीविकाभिर्मूढास्तत्त्वेन गृह्णंति॥ ६३६॥
या धनहार्या नार्यो निर्मर्यादाः स्वकार्यतात्पर्याः।
सह ताभिरपीहन्ते बत मन्दाः संगतमजर्यम्॥ ६३७॥
अपरोक्षधनो गम्यः श्रीमानपि नान्यथेति निर्दिष्टम्।
कन्दर्पशास्त्रकारैः कुतः कथा लुप्तविभवस्य॥ ६३८॥
व्यासमुनिनापि गीतं द्वावेव नराधमौ मनो दहतः।
योऽनाढ्यः कामयते कुप्यति यश्चाप्रभुत्वयुक्तोऽपि॥ ६३९॥
क्षीणद्रव्ये देहिनि दारा अपि नादरेण वर्तते।
किमुतादानैकरसाः शरीरपणवृत्तयो दास्यः॥ ६४०॥
अविदितहेयादेयास्तिर्यंचोऽपि त्यजंति पीतरसम्।
कुसुम किमु कार्यविदो वेश्या नरमात्तसर्वस्वम्॥ ६४१॥
उत्पादयति सदानो रागं रागात्मको यथाभ्यधिकम्।
निर्देहं निर्दानोऽपि सदा नो निःसन्देह तथैव मनुजन्मा॥ ६४२॥
यद्गीतं तद्गीतं भाविनि लाभेऽपि नातिबहुमानः।
तत्कालहस्तनिपतितमनियतपुंसां मुदे वित्तम्॥ ६४३॥
पीडितमधु मधुजालं तुच्छीभूतं च मन्मथग्रस्तम्।
मुञ्चन्ति मदनशेषं क्षुद्राश्च प्रकटरामाश्च॥ ६४४॥
एकः क्षीणात्यद्य प्रातर्भविता तथापरः क्रेता।
अन्यवशे क्षणमेकं न विक्रयः शाश्वतोऽस्ति वेश्यानाम्॥ ६४५॥

सन्दर्शितपरमार्थं भ्रूक्षेपकटाक्षदृष्टिहसितादि ।
पश्यंति ये सकर्णास्तल्लतमन्यच्च संक्रान्तम् ॥ ६ ४ ६ ॥
यदि नाम निराकरणे न समर्था श्छिन्नकार्यबन्धेऽपि ।
काचिन्महानुभावा बोद्धव्यं तदपि चेतनावद्भिः ॥ ६ ४ ७ ॥
तेनार्थेनोपकृतं तथापि तस्य स्वदेहदानेन ।
तच्चातीतं सम्प्रति निरर्थकः शुष्कशृंगारः ॥ ६ ४ ८ ॥
अवधीरणा रसायनमवमानो भवति यस्य परितुष्ट्यै ।
योग्योऽसौ पुरुषखरः खरतरनिर्भर्त्सितोक्तिकुलटानाम् ॥ ६ ४ ९ ॥
दीपज्वालाज्वलने व्रजतः खलु निर्वृतिं तयोस्त्रियान्भेदः ।
प्रथमा स्नेहेन विना तथापरा स्नेहयोगेन ॥ ६ ५ ० ॥
धर्मः काननमभिनवगुणवन्निःस्वस्य मदनयोगवतः ।
अर्थोऽर्थवतोऽभिगमात्कामः समरतिनरोपभोगेन ॥ ६ ५ १ ॥
यस्तु न धर्मप्राप्त्यै नार्थाय न कामसाधनोपायः ।
स पुमान्सुचरितनरैः पर्यनुयुक्तः किमाचष्टे ॥ ६ ५ २ ॥
(संदानितकम्)

कामोद्वेगगृहीतं धूर्तैरुपहस्यमानशृंगारम् ।
दारिद्र्यहतं यौवनमबुधानां केवलं विपदे ॥ ६ ५ ३ ॥
व्यपगतकोषे रागिणि याति लयं पानमात्रलाभकृते[1] ।
क्षुद्रा मधुकरिकाभे न तु गणिका चिंतितस्वार्था[2] ॥ ६ ५ ४ ॥
यासां कार्यापेक्षा सकटाक्षनिरीक्षणेऽपि वेश्यानाम् ।
दर्शनमात्रक्षुभितैर्वंच्यंते ताः कथं पुरुषैः ॥ ६ ५ ५ ॥

---

१ 'हृता' इति ब० पा० ।  २ 'र्थे' इति मु० पा० ।

क्लेशाय दुर्भगानां नाना[1]स्थितिगात्रभंगविन्यासः ।
गणिकाभिनयचतुष्टयमाकृष्ट्यै स्वापतेयपुष्टानाम् ॥ ६५६ ॥
किं धक्ष्यति भौमोऽपि ज्वलनः खलु तादृशं कुलांगारम् ।
यो दह्यते[2]ऽविरामं विरक्तदासीतिरस्कारैः ॥ ६५७ ॥
गृहमेतदीश्वराणां कांतारं दुष्प्रवेशमन्येषाम् ।
फूत्कृतमिद[3]मुद्भुजया 'न मालती कामसत्रदानपरा' ॥ ६५८ ॥
इति [4]चोदितनिजचेटीनिगदितकटुकाक्ष[5]रान्यकृतलज्जाः ।
आकर्णयतो वाचो दैवोपहतस्य तस्य मर्मरुजः ॥ ६५९ ॥
एवमभिधेयमानो बुध्यति यदि नो पशुर्नराकारः ।
तदिदं सुन्दरि वाच्यः प्रश्रितवचसा त्वया कामी ॥ ६६० ॥
प्रीयत एव तवोपरि हृदयं मे किंतु गुरुजनाधीना ।
मातृवचो[6]ऽतिक्रमणं न समर्था संविधातुमहम् ॥ ६६१ ॥
अर्हसि तावदतस्त्वं गंतुमितः कतिपयान्यपि दिनानि ।
पुनरपि भवतैव समं भोक्तव्यं जीवलोकसुखम् ॥ ६६२ ॥
निर्वासितेऽथ तस्मिन्यः कामी पूर्वमुज्झितो[7] भुक्त्वा ।
तस्य प्राप्तविभूतेर्युक्तिरियं भिन्नमस्थाने ॥ ६६३ ॥
उपवनलीलाविहरणहावोज्ज्वलमंजुलस्य सह तेन ।
वर्णनमितिवृत्तस्य स्मरजविकारास्तु वीचिते तस्मिन् ॥ ६६४ ॥

---

१ 'मानस्तुति' इति मु० पा० । २ 'दह्यते न विरसं' इति मु० पा० ।
३ 'दं सभुजया' इति मु० पा० । ४ 'तू' इति मु० पा० ।
५ 'व्यक्तलज्जा' इति मु० पा० । ६ 'गतिक्रमणं' इति मु० पा० ।
७ 'तोऽभूत्' इति मु० पा० ।

इदमुपवनमतिधन्यं निर्भरमालिंगितं सुरभिलक्ष्म्या।
मत्स्कन्[1]धार्पितपाणिर्बभ्राम स यत्र जीवितावीशः॥ ६६५॥

सख्य इतो भ्रमरकुलवासितया प्रियतमो मया सहसा।
वक्रीभवत्पयोधरमुपगूढोऽधीरसीत्कारम्॥ ६६६॥

रणदिन्दिन्दिरवृन्दे कूजत्कलकण्ठ[2]वाररमणीये।
अत्रातिमुक्तकगृहे मरुदीरणविधू[3]तकुसुमसंच्छन्ने॥ ६६७॥

मयि जाताधिकरागो बलवति मदने सहायसामग्र्या।
कान्तः पल्लवशयने नो तृप्तिमगाद्विविक्तकार्येषु॥ ६६८॥

(युगल[4]कम्)

प्रेंखोल[5]नस्य युक्त्या विधृत्याश्वंदय नखैर्धूर्तः।
चक्रे मां मदनमयीं [6]व्रततिप्रेंखामिमां समारूढाम्॥ ६६९॥

स्पृहणीयोऽयमशोकः स्पृष्टो यद्व[7]ल्लभेन हस्तेन।
अस्मद्वतंसकार्थं नूतनदलपल्लवान्विचारयता॥ ६७०॥

अस्मिन्सहकारतले तस्योत्सङ्गे सलीलमासीना।
अशृणवमहमिति वाचः पश्यंती विलसितानि तरुणानाम्॥६७१॥

उत्थापय मानरसे[8] दयितं चरणाग्रनिपतितं तूर्णम्।
अत्याकृष्टं त्रुट्यति सुदृढमपि प्रेमबन्धनं मूढे। ६७२॥

१ 'मत्कण्ठाश्रित' इति मु० पा०। २ 'वार' इति मु० पा०।
३ 'वितत' इति मु० पा०। ४ मुद्रितपुस्तके नास्ति।
५ 'प्रेंखोलनवितरगवुक्त्या' इति ब० पा०।
६ 'व्रतपुंखमिमां समधिरूढाम्' इति मु० पा०।
७ 'यद्दुर्लभेन' इति मु० पा०। ८ 'मानवशे' इति मु० पा०।

तिष्ठन्नपि[1] यातसमः किं तेन निवारितेन सखि पशुना ।
यामीति निष्प्रकम्पा विनिःसृता यस्य [2]साधरे वाणी ॥ ६७३ ॥
आयुःसारं[3] यौवनमृतुसारः कुसुमसायकवयस्यः ।
सुन्दरि जीवितसारो रतिभोगरसामृतस्वादः ॥ ६७४ ॥
रम्यं कुसुमस्तवकं कुरु मे प्रिय कैंकिरातमवतंसम् ।
तिष्ठतु वा किमनेन प्रत्यग्रमशोककिसलयं चारु ॥ ६७५ ॥
अस्तामास्तामेतन्नापय मां सिंदुवारमभिरामम् ।
नहि नहि राजति सुतरां चूतद्रुममंजरी कर्णे ॥ ६७६ ॥
धिक्तारुण्यमकान्तं धिक्कान्तं यौवनेन रहितं च ।
धिक्द्वयमपि मन्मथसामर्थ्यविकासितं विना सुरतम् ॥ ६७७ ॥
जनितोऽप्यपराधशतैर्वामे तस्मिंश्चिरप्ररूढोऽपि ।
[4]अवगतमधुना सख्या न[5] वसन्तमतीत्य वर्तते मानः ॥ ६७८ ॥
वर्षशतस्य हि सारः [6]कालजवः प्रथममेलकस्थानम् ।
सचकितमागच्छन्ती सोत्कलिकैर्यत्र दृश्यते रमणी ॥ ६७९ ॥
किं निर्मितोऽसि धात्रा नवोऽपरः किमु वसन्तगुण एषः ।
कुसुमशरपूर्णतूणः किमुताभवदन्य एष कंदर्पः ॥ ६८० ॥
नो पश्यसि यदि ककुभः प्रचुरो[7]ज्ज्वलकुसुमसुरभिरमणीयः ।
परभृतकूजनमिश्रं न शृणोषि यदि द्विरेफझंकारम् ॥ ६८१ ॥

---

१ 'उत्तिष्ठन्नपि यातः' इति मु० पा० ।
२ 'माधवे' इति ब० पा० ।
३ 'शास्त्रविकासं' इति ब० पा० ।
४ 'च्वधि' इति मु० पा० ।
५ 'तव सत्यमतीत्य' इति मु० पा० ।
६ 'कलेवर' इति मु० पा० ।
७ 'दल' इति मु० पा० ।

गन्धं यदि च न लभसे वासितदिग्व्योम सुमनसां स्वच्छम् ।
अनुभवसि यदि स्पर्शं नो शीतलदाक्षिणात्यपवनस्य ॥ ६८२ ॥
[1]रसनेन्द्रियैकशेषः परसंचार्याजनेन परिभूतः ।
नार्हसि तदिति त्यक्तो निजाश्रमं गन्तुमन्यतो निरतः ॥ ६८३ ॥
अस्मिन्सरसि सलीलं करयंत्रविनिर्यदंबुधाराभिः ।
दयितेन ताड़िताहं मयाप्यसावाहतो मृणालिकया ॥ ६८४ ॥
पुनरन्तर्जलमग्नो मामुपगम्याविभावितः सहसा ।
उच्चिक्षेप सहासं हासितसन्निहितपरिवारः ॥ ६८५ ॥
संसक्तार्द्रावरणं जघनं [2]नः पश्यतस्तदा तस्य ।
प्रथमाकांक्षाकूतं भेजे सम्भोगशृंगारः[3] ॥ ६८६ ॥
कालप्रदेशवेष[4]व्यापारस्थितिविशेषघटनाभिः ।
चिररूढ़ोऽपि हि यूनां नवत्वमुपनीयते रागः ॥ ६८७ ॥
सादरमर्पयतोऽङ्कं गोत्रस्खलनापराधिनस्तस्य ।
सख्यः स्मरामि सहसा विल[5]क्षतां क्लिष्टहसितस्य ॥ ६८८ ॥
प्रत्ययनखव्रणितस्तनान्तरे [6]क्षिपति लोचने स्पृहया ।
[7]प्रेयसि व्रीताच्छादनमकरवमहमब्जिनीपत्रम् ॥ ६८९ ॥
चिरशातर्कितसम्भोगभिंतनलिनीपलाश[8]पुटमारात् ।
आहतया यद्विहतं स्वस्थधिया [9]तन्न शक्यते कर्तुम् ॥ ६९० ॥

---

१ 'वसने स्त्रियैकशेषः खलु पंचार्यो गुणेन परिभूतः ॥' इति मु० पा० ।
२ 'ननु' इति मु० पा० ।
३ 'रम्' इति मु० प० ।
४ 'भोग' इति मु० पा० ।
५ 'च्य' इति मु० पा० ।
६ 'स्पृशति' इति म० पा० ।
७ 'प्रेमषिताच्छा...' इति मु० पा० ।
८ 'पठभावात्' इति मु० पा ।
९ 'नैव' इति मु० पा० ।

सुश्लिष्टो [1]हावविधिर्मदनालसगात्रजृम्भितं [2]स्खलितम्
गूढस्थानप्रकटनमंगुलिविस्फोटनं स्मितं सुभगम् ॥ ६९१ ॥
नीवीबन्धविमोक्षो मुहुर्मुहुः केशपाशविश्लेषः ।
स्वाधरदशनग्रहणं बालकपरिचुम्बनं रतोत्सुकता ॥ ६९२ ॥
साकांक्षितं क्षिपंत्या तरलायतलोचनं मुहुः कान्ते ।
उद्दिश्य तद्वयस्यकमिति शोकप्रस्त[3]वस्तुगिरः ॥ ६९३ ॥
एकीभावं गतयोर्जलपयसोर्मित्रचेतसोश्चैव ।
व्यतिरेककृतौ शक्तिर्हंसानां दुर्जनानां च ॥ ६९४ ॥
येन तदा [4]मामूचे परिजनमुत्सार्य विधृतनटमन्युः ।
दर्शितहितस्वरूपः परपीड़ाकरणपण्डितः [5]प्रखलः ॥ ६९५ ॥
अविदितगुणान्तराणां को[6] दोषः [7]प्रान्तदेशवासानाम् ।
स्वाधीनकुंकुमा अपि यद्दिदधति बहुमतिं नीले ॥ ६९६ ॥
क्व महीतलरम्भा[8] त्वं न्यक्कृतचन्द्रप्रभा स्वदेहरुचा ।
[9]चित्रलता क्व वराकी नीचैरुपसेवितारोहा ॥ ६९७ ॥
[10]यस्य न खलु विगणिताः प्रख्यातमानो महाधनाः कुलजाः ।
सोऽद्य हृदयेन तस्यां त्वयि तिष्ठति बाह्यवृत्तेन ॥ ६९८ ।
तामेव समाचरणां सद्भावेन प्रवर्तितां निपुणैः[11] ।

---

१ 'दूरविधि' इति मु० पा० । २ 'ललितम्' इति मु० पा० ।
३ 'वर्णशिरः' इति मु० पा० । ४ 'मा भूवुः' इति मु० पा० ।
५ 'प्रथमः' इति मु० पा० । ६ 'नो' इति मु० पा० ।
७ 'प्र' इति मु० पा० । ८ 'रम्भात्वं' इति मु० पा० ।
९ 'मि' इति मु० पा० । १० 'यस्यार्थे न विग ...' इति ब० पा० ।
११ 'णाः' इति मु० पा० ।

विंदंति तत्र कुशला: स्नेहविरूप[1]प्रभेदेन ॥ ९९ ॥
तव[2] तु विरूढप्रेम्णस्तत्कर्मविचेतनं[3] मनोवृत्तिम् ।
नारोहति तु मयैवं निवेदितं पारिचित्येन[4] ॥ १०० ॥
इति दुर्जना[5]भिनिःसृतवाग्विषदूषितसमस्तवपुषो मे ।
ईर्ष्यारुष: प्रवृद्धाश्चिरूढप्रणयखण्डनप्रभवा: ॥ १०१ ॥
लघुहृदयतया [6]तस्माद्दुर्भाषितवज्रपातविहतानाम् ।
[7]वक्तृविशेषवितर्को न स्पृशति प्रायशो मन: स्त्रीणाम् ॥ १०२ ॥
(युगलकम्)
प्रिय[8]मपि वदन्दुरात्मा क्षिपति विपत्सागरे दुरुत्तारे ।
आसाद्य प्राण[9]भृतो मृतये परिलेढि जिह्वया [10]खड्ग: ॥ १०३ ॥
अतिकोमलमतिपरिमितवर्णं लघुतरमुदाहरति शठ: ।
परमार्थत: स हृदयं दहति पुन: कालकूटघटित इव ॥ १०४ ॥
हितमधुराक्षरवाणीव्यवहारमनुप्रविश्य [11]तन्मौनम् ।
सरला दुराशयानामुपघातं फलत एव विंदति ॥ १०५ ॥
परसंतापविनोदो यत्राहनि न प्रयाति निष्पत्तिम् ।
अंतर्मना असाधुर्न गणयति [12]तदायुषो मध्ये ॥ १०६ ॥

---

१ 'रूपे प्रभेदेन' इति मु० पा० । २ 'भवतु' इति ब० पा० ।
३ 'सत्कर्मविवेचने मनोवृत्तिः मारोहतीति सेव निवेदितं परिजनेन...' इति मु० पा० । ४ 'भि' इति ब० पा० । ५ 'शभि' इति ब० पा०
६ 'तस्मा' इति ब० पा० । ७ 'र्त्म' इति मु० पा० ।
८ 'प्रियमपि वदति दुरात्मा क्षिपति विपत्तत्त्वमनुधारि' इति मु० पा० ।
९ 'हतो' इति मु० पा० । १० 'रवधम्' इति मु० पा० ।
११ 'तन्मानम्' इति मु० पा० । १२ 'तदा सुखोमध्ये' इति मु० पा० ।

दिवसांस्तानभिनन्दति बह्व मनुते तेषु जन्मनो लाभम् ।
ये यांति दुष्टबुद्धेः परोपतापाभियोगेन ॥ ७०७ ॥
विकसितवदनः पिशुनः प्रोत्फुल्लविलोचनो[१] यथा भ्रमति ।
[२]मन्ये तथा न जातः सद्दहितकरणश्रमो वन्ध्यः ॥ ७०८ ॥
शठमृगयुः कुसृतिशरै[३]रज्ञातप्रतिविधीन्साधुमृगान् ।
अ[४]थसुलक्ष्यवेधो[४] निष्पन्नपरिश्रमं व्रजति ॥ ७०९ ॥
अनुकूलवरपुरंध्रिषु पुरुषाणां बहुमूलरागाणाम् ।
नयति मनो दुःशीलः कुसुमास्त्रो हीनपात्रेषु ॥ ७१० ॥
सावरणं व्रजतोऽन्यां[५] कौतुकदृष्ट्या प्रसङ्गतो दयिताम्[६] ।
बुद्धापि विदग्धधियो वर्तते नान्य[७]धर्मेण ॥ ७११ ॥
सत्यं प्रेमणि वृद्धे व्यथयति हृदयं मनागपि स्खलितम् ।
अव[८]धृतनिजमाहात्म्यास्तथापि धीरा न मुह्यंति ॥ ७१२ ॥
स्वच्छन्दं[९] पिबतु रसं भ्रांत्वा भ्रांत्वा वनानि कुसुमेषु ।
अनुभूतगुणविशेषः पुनरेष्यति मालतीं मधुपः ॥ ७१३ ॥
मालत्या गुण[१०]वार्त्तां नो सम्यग्वेत्ति मधुकरस्तावत् ।
अनुभवमेति न यावत् सुमनोन्तरसङ्गमास्वादे ॥ ७१४ ॥

---

१ ‘नस्तथा’ इति मु० पा० ।
२ ‘मन्ये यथा नराणां परहितकरणे श्रमो वन्ध्यः’ इति मु० पा० ।
३ ‘तैः’ इति मु० पा० ।
४ ‘थः सनिश्चये परिश्रमं’ इति मु० पा० ।
५ ‘न्यान्कौतु ...’ इति मु० पा० ।
६ ‘मृ’ इति मु० पा० ।
७ ‘नाद्य धर्मेण’ इति मु० पा० ।
८ ‘भवधूत’ इति मु० पा० ।
९ ‘न्दः’ इति मु० पा० ।
१० ‘वार्तां’ इति मु० पा० ।

कोमलमान[1]कदर्थां भजमानो भजति दीप्ततामधिकाम् ।
सञ्ज्वाल्यमानदारुः पावक इव सुप्रभ[2]स्नेहः ॥ ७१५ ॥
यः पुनरतिकोपानलसन्तापवशेन दूरमाकृष्टः ।
काचमणिः खलु स यथा परिणामे खण्डखण्डमुपयाति ॥ ७१६ ॥
वेतनलाभाद्बहवः सेव्यन्ते सौष्ठवेन पंचजनाः ।
विश्राम्यति यत्र मनः स तु दुष्प्रापः सहस्रेषु ॥ ७१७ ॥
मन्वादिमुनिवरैरपि कालत्रयवेदिभिः सुदुर्ज्ञेयम् ।
तत्सुकृतं यस्य फलं रभसागतवल्लभाश्लेषः ॥ ७१८ ॥
यातेऽपि नयनमार्गे प्रेयसि यस्याः स्मृतिर्व्यलीकेषु ।
मन्ये तां प्रति नियतं कुण्ठितशरपंचको मदनः ॥ ७१९ ॥
जीव्यत एव कथंचिद्वृत्तिमिमां सद्भिरवगीताम् ।
विजहाति यत्र गणिका तद्वांछितरमणलाभलोभेन ॥ ७२० ॥
कंटकिनः कटुकरसान्करीर[3]खदिरादिविटपतरुगुल्मान् ।
उपभुंजाना करभी दैवादाप्नोति मधुरमधुजालम् ॥ ७२१ ॥
का स्त्री[4] न प्रणयिवशा का विलसितयो मनोभवविहीनाः ।
को धर्मो निरुपशमः किं सौख्यं वल्लभेन रहितानाम् ॥ ७२२ ॥
स्वाच्छन्द्यफलं बाल्यं तारुण्यं रुचिरसुरतभोगफलम् ।
स्थविरत्वमुपशमफलं परहितसम्पादनं च जन्मफलम् ॥ ७२३ ॥
अभिदधतीमिदमालीमवगम्य गृहीतयेव[5] भूतेन ।

१ 'कदम्बां' इति मु० पा० ।    २ 'सुप्रभः स्नेह.' इति मु० पा०
३ 'बदरा' इति मु० पा० ।    ४ 'स्त्रीर' इति ब० पा० ।
५ 'यौवनभृतेन' इति मु० पा० ।

यौवनसुखेन सार्धं [1]मयैव यूयं परिच्छिन्नाः ॥ ७२४ ॥
अधुना[2]नुतापपावकमध्यगता पच्यमानसर्वाङ्गी ।
निष्फलजन्मप्राप्तिर्जीवाम्युच्छ्वाससमादेण ॥ ७२५ ॥
स्थानेषु येषु युष्मत्सङ्ग[3]तया क्रीडितं चिरं धृत्या ।
तानि खलु वीक्षमाणा भवामि कण्ठस्थितप्राणा ॥ ७२६ ॥
अन्य[4]वशेन विसंज्ञा कृतभूषा[5] यंत्रसूत्रसंचारा ।
दारुमयीव प्रतिमा विदधामि विडम्बना बह्वीः ॥ ७२७ ॥
यदि नामोदरभरणप्राप्त्यै कुरुतेऽन्यपुष्पसंश्लेषम् ।
तदपि न पुष्टिर्भृङ्गया अपिबन्त्या आर[6]विन्दमकरन्दम् ॥ ७२८ ॥
आस्तामपरो लोकः क्रीडा[7]पेक्षो परापदि प्रीतः ।
व्यसनान्तरे पतन्ती न वारिता परिजनेनास्मि[8] ॥ ७२९ ॥
किं वा बहुभिः कथितैः सम्प्रति हि मयापि नियमिता बुद्धिः ।
स्थास्यामि संनियुक्ता भवद्गृहे प्रेष्यभावेन[9] ॥ ७३० ॥
इति नेत्रादिविकारैर्वशमुपनीतं प्रलीनधैर्या[10]ङ्गम् ।
[11]मारग्रहाभिभूतं परिभ्रष्टप्राङ्गिराकृतिस्मरणम् ॥ ७३१ ॥
प्रादुर्भूतरिरंसं क्षणे क्षणे जघनदेशगतदृष्टिम् ।
पक्वाम्रमिव विमोक्ष्यसि पूर्ववदाचूष्य[12] निःशेषम् ॥ ७३२ ॥

---

१ 'तनयैरेष गृहपरिच्छिन्ना' इति मु० पा० ।
२ 'नाम्नु ताप' इति मु० पा० ।
३ 'त्या' इति मु० पा० ।
४ 'अन्यवशेना' इति मु० पा० ।
५ 'षण्वस्त्रपत्र' इति मु० पा० ।
६ 'मधुरष्टन्द' इति मु० पा० ।
७ 'पेक्षापरो यदि प्रीतिः' इति मु० पा० ।
८ 'पि' इति मु० पा० ।
९ 'कार्येषु' इति ब० पा० ।
१० 'धैर्यस्य' इति मु० पा० ।
११ 'शार' इति मु० पा० ।
१२ 'चूष्य' इति मु० पा० ।

[1]स्वशरीरामिषदिग्धं [2]वक्रस्मितदृष्टिपात[3]वाग्बडिशम् ।
प्रक्षि[4]प्याकृष्य जडं स्फुरणेन विवर्जितं सुपरिपुष्टम् ॥ ७३३ ॥
हस्तद्वयान्तरागतमुपचारय [5]परिव्ययेन संस्कृत्य ।
भुक्त्वा यावन्मांसं त्यजसि चर्मास्थिशेषितं मत्स्यम् ॥ ७३४ ॥
शृणु सुश्रोणि यथास्मि[6]न्कमलेश्वरपादमूलमंजर्या ।
प्रवराचार्यदुहित्रा राजसुतस्त्वर्वितस्य मुक्तस्य ॥ ७३५ ॥
[7]आसीच्छ्रीसिंहभटो नाम्ना नृपतिर्महीयसां श्रेष्ठः ।
तस्यात्मजोऽधितस्थौ निवेशनं देवराष्ट्र[7]सम्बद्धम् ॥ ७३६ ॥
स कदाचिद्वृषभध्वजदिदृक्षया परिमितासपरिवारः ।
अनुवर्तमान आगात्तारुण्योदीर्णवेशचरितानि ॥ ७३७ ॥
[8]मूर्धत्रिभागसंस्थितवृहदम्बरचीरकेशसंयमनः ।
अन्या[9]च्छगात्ररागो घनकुंकुमलिप्तकर्णकेशाग्रः ॥ ७३८ ॥
सिद्धार्थबीजदन्तुरललाटतिलकोपयुक्तताम्बूलः ।
श्रवणनिवेशितकुण्डलटिट्टिभकप्रायकन्धराभरणः ॥ ७३९ ॥
केयूरस्थानगत[10]सुवर्णभृतसंचगर्भजतुगुडकः ।
मणिबन्धनविन्यस्तप्रव[11]लांकुरजातरूपमणिमालः ॥ ७४० ॥
धृतवेत्रदण्डकूर्चकपरिवेष्टितसामिधेनु[12]खड्गस्य ।

१ 'स्व' इति मु० पा० । २ 'चक्रमित' इति मु० पा० ।
३ 'मस्खलितम्' इति मु० पा० । ४ 'प्रक्षिप्य क्षिप्रतर' इति मु० पा० ।
५ 'येन सत्कृत्य' इति मु० पा० । ६ 'कलशेश्वर' इति ब० पा० ।
७ 'ज' इति मु० पा० । ८ 'पूर्व' इति मु० पा० ।
९ 'अल्पतररागसांद्रो' इति मु० पा० । १० 'स्वर्णाढ्य' इति ब० पा० ।
११ 'ष' इति मु० पा० । १२ 'नक्र' इति ब० पा० ।

मृदुतरपटिकावरणः शब्दोत्वण[1]लुचुवाकचरणश्च: ॥ १४१ ॥
[2]गम्भीरेश्वरदास्यां [3]लग्नः किल [4]तव वयस्य[5]को धौर[6] ।
प्राप्स्यति मापि दुराशा वर्षचितयेन यन्मया प्राप्तम् ॥ १४२ ॥
दर्शयति दिशः फलिता अमृतगभस्तिं करे[7]ऽवतारयति ।
[8]सुरदेवि चन्द्रवर्मा निर्वस्तुकवाक्प्रपचेन ॥ १४३ ॥
त्वामनुयान्त सम्प्रति पश्या[9]मि कुरंगिकेऽत्र वसुशेषम् ।
[10]सुनिरूपिता भविष्यमि विषमा[11] गुड़जिह्विका तस्य ॥ १४४ ॥
[12]चर्चयति जलं योऽसौ हरिणि[13] हतो [14]धूर्तताभिमानेन ।
लिखति शतं[15] दशवृद्ध्या स निमज्जति तरलिकावर्ते ॥ १४५ ॥
गृह्णामि यत्पटान्ते मम पश्यत एव [16]नन्द मदिराचौम् ।
अत आवयोरवश्य मा[17] वत्स्यमि नोक्रमंतर भवति[18] ॥ १४६ ॥
योऽयं गृहीतवृषि[19]कः कुश[20]कर्णो विधृतदण्डकाषायः ।
लोकस्य[21]शशांको कृता[22]पसारो विलोकयन्याश्री[23] ॥ १४७ ॥

१ 'चुचुराकचरणातः' इति मु॰ पा॰ ।
२ 'गम्भा' इति मु॰ पा॰ । ३ 'नग्न' इति मु॰ पा॰ ।
४ 'तर' इति मु॰ पा॰ । ५ 'वयस्य को' इति मु॰ पा॰ ।
६ 'वौरः' इति मु॰ पा॰ । ७ 'करेण वारयति' इति मु॰ पा॰ ।
८ 'सुरतक्रतिचन्द्रवर्मा निर्वर्णक...' इति मु॰ पा॰ ।
९ 'यामि कुरगिके ...' इति मु॰ पा॰ । १० 'अनुरूपिका' इति मु॰ पा॰ ।
११ 'मं' इति मु॰ पा॰ । १२ 'वंचयति जनं' इति मु॰ पा॰ ।
१३ 'हरिनिहतो' इति मु॰ पा॰ । १४ 'भूलता' इति मु॰ पा॰ ।
१५ 'शुभ' इति मु॰ पा॰ । १६ 'मन्द' इति मु॰ पा॰ ।
१७ 'सा' इति मु॰ पा॰ । १८ 'ता' इति मु॰ पा॰ ।
१९ 'भूमिः' इति मु॰ पा॰ । २० 'कुमुदाकर्णो' इति मु॰ पा॰ ।
२१ 'स्य सा शशांका' इति मु॰ पा॰ । २२ 'वसरो' इति मु॰ पा॰ ।
२३ 'श्री' इति मु॰ पा॰ ।

कुर्वाणो मौनव्रतमुत्पादितमकलवैष्णवश्र[१]द्धः ।
हरिशासनं[२] प्रपन्नस्त्रिपुरान्तकदर्शनापदेशेन ॥ ७४८॥
स्त्रैणं पश्यति युक्त्या साकांच वर्जितान्यजनदृष्टिः ।
कुमुदिनि मम हृदयगत भवितव्यं व्याजलिंगिनानेन ॥ ७४९ ॥

( अंतर्विशेषकम् )

पश्यत्यदृश्यमानो निरीक्षितो वीक्षते परां ककुभम् ।
ब्रूते किंचिदसम्बद्धमभियुक्तो भवति कीलितध्यानः ॥ ७५० ॥
न जहाति समासन्नं नोत्सहते पार्श्वगोचरे स्थातुम् ।
एष मनुष्यो मन्ये निष्पृतिभः साभिलाषश्च ॥ ७५१ ॥

( अंतर्युगलकम् )

तेऽतीतास्[३]ताः खलु दिवसा क्रियते नर्म त्वया समं येषु ।
अधुनाचार्याणी[४] त्वं पाशु[५]पताचार्यसम्बन्धात् ॥ ७५२ ॥
भ्रमसि यथेष्टं तावत्कुर्वाणो युवतिपल्लवग्रहणम् ।
लोलिकदास[६] न यावन्नरदेवीपाशिकां विशसि ॥ ७५३ ॥
एवंप्रका[७]रवाक्यप्रसक्तविटचे[८]टिकासमाकीर्णम् ।
सेवाचतुरपुरःसरं विजनीकृतव[९]र्त्मदेवकुलम् ॥ ७५४ ॥
उत्पादितहरपूजो निष्ठुरयाष्टीकनियमिते लोके ।
त्वरितनियोगिस्थापित[१०]मासनमध्यास्त समरभटः ॥ ७५५ ॥

१ 'प्रीति·' इति मु० पा० ।
२ 'नपंसन्न' इति ब० पा० ।
३ 'नीता·' इति मु० पा० ।
४ 'पाल्वं' इति मु० पा० ।
५ 'भाशुङ्काचार्य' इति ब० पा० ।
६ 'सतया च द्रविणकुल पाशिकां विशति' इति मु० पा० ।
७ 'प्रकासवाश्य' इति मु० पा० ।
८ 'वीटिका' इति मु० पा० ।
९ 'धर्म इति मु० पा० ।
१० 'मध्यास्तसमरतत्त्वसंपूर्णम्' इति मु० पा० ।

अग्रोपविष्टनर्तक[1]वांशिकगाढप्रकाशयुवतिगणः ।
श्रेष्ठिप्रमुखवणिग्जनढौकितताम्बूलकुमुदपटवासः ॥ ७५६ ॥

विविधविलेपनखरटित[2]चक्रकवर[3]खड्गधारिणाशून्यः ।
पृष्ठत आत्तकृपाणैः शिरोभिरन्यैश्च विश्वस्तैः ॥ ७५७ ॥

ताम्बूलकरंकभृता संदंशगृहीतवीटिकाग्रहणे ।
ईषत्स्पृष्टं[4] कुर्वन्मन्दं खट[5]कामुखेन वामेन ॥ ७५८ ॥

पार्श्वविस्थित[6]नर्मप्रियसचिवन्यस्तपूर्वतनुभागः ।
पप्रच्छ[7] कुशलवार्तां स[8] वणिग्जननर्तकप्रभृतीन् ॥ ७५९ ॥

(कुल[9]कम्)

अथ वैतालिक उच्चैरुपसंहृतलोककलकले धीरम् ।
अभितुष्टाव तमित्थं प्रसन्नगम्भीरया वाचा ॥ ७६० ॥

जय देव परबलान्तक गुरुचरणाराधनैक[10]कृतचित्त ।
वरवनिताजघ[11]नासन दारिद्र्यतमःप्रचण्डकर[12]ज्वाल ॥ ७६१ ॥

रणवीरवंशभूषण गुरुवसुधादेवपूजनप्रसक्त ।
शरणागताभयप्रद हितबान्धवबन्धुजीवमध्याङ्क[13] ॥ ७६२ ॥

१ 'संशियाह' इति मु० पा० ।
२ 'खराटिल्क' इति मु० पा० ।
३ 'धर' इति मु० पा० ।
४ 'त्पृष्टं' इति मु० पा० ।
५ 'टि' इति ब० पा० ।
६ 'नसद्गस' इति ब० पा० ।
७ 'प्रच्छस' इति मु० पा० ।
८ 'सवणि...' इति मु० पा० ।
९ 'चक्कलकम्' इति मु० पा० ।
१० 'शुभ' इति मु० पा० ।
११ 'जनमोहन' इति मु० पा० ।
१२ 'दाम' इति मु० पा० ।
१३ 'मांसल्व' इति मु० पा० ।

[1]ईदृक्प्रतापदहनो [2]भावत्को व्याप्तगगनदिक्चक्रः ।
दृष्टो जलाय[3]माने रिपुवनितातिलकशोभासु ॥ ७६३ ॥
एष विशेषः स्पष्टो वह्नेश्च त्वत्प्रतापवह्नेश्च ।
अंकुरति तेन दग्धं दग्धस्थानेन नोद्भवो भूयः ॥ ७६४ ॥
श्रीफलभुक्पचहतो विग्रहरसिको विमुक्तशस्त्ररतिः ।
राज[4]स्थितिं न मुंचति हतलक्ष्मीकोऽपि तव विपक्षगणः ॥ ७६५ ॥
ददतो वांछितमर्थं सदा[5]नुरक्तस्य तव गृहं त्यक्ता ।
स्त्रीचापलेन कीर्तिर्निर्ग्राममिता गता ककुभः ॥ ७६६ ॥
भवतो भवतो धैर्यं तेन हि भिन्नोऽन्यथ[6]को रिपुः प्रणतः ।
मुक्तास्त्वया[7] हि बहवो रिपवस्तु प्रेक्षकाः समरे ॥ ७६७ ॥
अटता धात्रीमखिलामिदमाश्चर्यं मया परं दृष्टम् ।
धनदोऽपि नयननन्दन परिहरसि यद्‌ग्रसम्पर्कम् ॥ ७६८ ॥
इदमपरमद्भुततमं युवतिसहस्रैर्विलुप्यमानस्य ।
वृद्धिर्भवति न हानिर्यत्तव सौभाग्यकोषस्य ॥ ७६९ ॥
अपरं विस्मयजननं धवलत्वं [8]नापयाति यद्भवतः ।
ललनालोचनकुवलयदलत्विषा शबलितस्यापि ॥ ७७० ॥
हृदयेषु कामिनीनामेकोऽनेकेषु वससि येन त्वम् ।
जन[9]क कुसुमास्त्रपाणेः पुरुषोत्तम तेन विश्वरूपोऽसि ॥ ७७१ ॥

१ 'तादृक्' इति मु॰ पा॰ । २ 'स तावको' इति मु॰ पा॰ ।
३ 'वसाने' इति मु॰ पा॰ । ४ 'स्थ' इति मु॰ पा॰ ।
५ 'दाने रक्तस्य' इति मु॰ पा॰ । ६ 'ऽन्तको' इति मु॰ पा॰ ।
७ 'येति' इति मु॰ पा॰ । ८ 'नोपयाति' इति मु॰ पा॰ ।
९ 'जनकः कुसुमास्त्रभृतस्तेन त्वं इति मु॰ पा॰ ।

किं वहसि वृथा गर्वं प्रियोऽहमिति योषितां नराधीश ।
कांक्षंति स्म मुरारिं षोडशगोपीसहस्राणि ॥ ७७२ ॥
[1]कार्पण्येन ययाचे मखसमये यो बलिं हृषीकेशः ।
न स भवति समो भवता दानैकनिषण्णहृदयेन ॥ ७७३ ॥
भूमिभृतामुपरिस्थित उन्नतये सकलजीवलोकस्य ।
तृष्णा[2]संतापहरो मेघ इव कदा न दत्तस्त्वम् ॥ ७७४ ॥
वक्रमार्गो भंग[3]युतः कुसृतिपरो गोत्रभेदकरणपटुः ।
गंगाजलप्रवाहः पूज्य[4]दिशा केवलं तव समानः ॥ ७७५ ॥
दुर्व्यवहारोत्पत्तिमौ[5]र्ख्यप्रसरो विवेकिता[6]वसतिः ।
एकस्त्वं दोषज्ञः कृतीकृतो येन कलिकालः ॥ ७७६ ॥
सुगतोऽपि नाजिविमुखो वृषध्वजोऽपि न विषादितायुक्तः ।
उद्यतशस्त्रोऽपि रिपौ कथमसि सत्त्वा[7]सिक्तो जातः ॥ ७७७ ॥
सत्त्वमणिरने[8]कभोगो गुरु[9]भारसहः स्थिरात्मताम्स्थानम् ।
नरदेव चित्रमेतद्यदशेषगुणैस्त्वमाश्लिष्टः ॥ ७७८ ॥
प्रकृतिलघोर्येन कृता जघन्यवर्णस्य गौरवापत्तिः ।
जघनचपला यदार्या स पिङ्गलस्ते कथं तुल्यः ॥ ७७९ ॥

१ 'ब्राह्मण्येन' इति ब० पा० ।
२ 'दृष्ट. सतापहरो मेघवद्दामारदानदत्तस्त्वम्' इति मु० पा० ।
३ 'भङ्ग' इति मु० पा० ।
४ 'पुण्य' इति प० बा० ।
५ 'मौर्ख्यप्रसवो' इति ब० पा० ।
६ 'प्रसङ्गः' इति मु० पा० ।
७ 'सत्त्वाश्रितो' इति मु० पा० ।
८ 'र्थैक' इति मु० पा० ।
९ 'गुरुतारङ्ग.' इति मु० पा० ।

[1]यस्य न जातिर्नात्मा [2]नार्थज्ञानं न मानसे प्रशमः ।
भवसि भवसागर[3]रत्नं तेनाद्वयवादिना सदृशः ॥ ७८० ॥
तत्रापि वृद्धियोगस्तस्मिन्नपि पुरुषगुणगण[4]ख्यातिः ।
परिभाषा तत्रापि व्याकरणान्नातिरिच्यसे[5] तेन ॥ ७८१ ॥
निर्व्याजस्तवनोऽपि त्यक्ताक्षेपोऽपि निरुपमानोऽपि ।
[6]सद्रूपकजातिगुणैर्नाथ त्वं गामलंकुरुषे ॥ ७८२ ॥
अन्यैव वर्णनैषा भवतु[7] लोकान्तरास्थिता कापि ।
वामो यथैव शत्रुषु मित्रेषु तथैव वामोऽसि ॥ ७८३ ॥
पूजयसि येन गुरुजनमभिनन्दसि येन साधुचरितानि ।
प्रीणयसि येन विप्रान्नृपनन्दन तेन तेन वृषल[8]स्त्वम् ॥ ७८४ ॥
दैन्यमिदं यच्छ्लाघा क्रियते ते रचमापि न ममस्य ।
न स[9]वल्लभकरोद्योषिति भवांस्तु भुङ्क्ते प्रसह्य रिपुलक्ष्मीम् ॥ ७८५ ॥
लावणिकाचाटु[10]वचस्तवनं [11]यल्लाभहेतुरस्माकम् ।
[12]तत्पतति ते स्वरूपे यामि नरः सन्तु सौख्यानि ॥ ७८६ ॥
श्रुत्वा[13]नन्तरमवदद्वन्दिनमभिनंद्य साधुवादेन ।
आस्स्व[14] किमाकुलता ते यास्यसि तुष्टो मया प्रहितः ॥ ७८७ ॥

१ 'कस्य' इति मु० पा० ।
२ 'त्व' इति मु० पा० । ३ 'न त्व केन इय ...' इति मु० पा० ।
४ 'स्यांक्ति' इति मु० पा० । ५ 'ते' इति मु० पा० ।
६ 'संज्ञापक' इति मु० पा० । ७ 'दूरात्मा' इति मु० पा० ।
८ 'भ' इति मु० पा० । ९ 'श्ठम' इति ब० पा० ।
१० 'रामणिका' इति ब० पा० । ११ 'पल्ला' इति मु० पा० ।
१२ 'उत्पातितिस्वरूपे यां तीतः सतु सो स्वामो' इति मु० पा० ।
१३ 'त्वोत्तरमवदत्त व...' इति मु० पा० । १४ 'ग्रस्ति' इति मु० पा० ।

पुनरपि पठ तद्युगलं गीतिकयो[1]र्यत्पुरा पठितम् ।
कक्षांतरितेन मम स्थितस्य कुलपुत्रिका[2]वासे ॥ ७८८ ॥
त्वयि वदति साधुवादं वागियमुन्मुद्रिता बुधसमाजे ।
अभिधायेति पपाठ त्रिस्थानविशुद्धनादेन ॥ ७८९ ॥
एका खण्डनकुपिता विरसान्या प्रणय[3]भंगवैलक्ष्यात् ।
काचिन्निकटतरासनमप्राप्य बिभर्ति निर्वेदम् ॥ ७९० ॥
अन्या कलहान्तरिता नवपरिणयलज्जयापरा सहिता ।
रमणीगणमध्यगतः स्मरातुरः किं करोतु वल्लजानिः ॥ ७९१ ॥
(सन्दानितकम्)

अभ्युपपत्त्यवबोधकमस्तकचलनं विधाय विकृतभ्रूः ।
नृत्याचार्यमवादीदेतस्मिन्किं सु[4]भंगीतम् ॥ ७९२ ॥
स[5] उवाच ततो वणिजो नेतारो यत्र यत्र पात्राणि ।
गाथायतनं दास्यस्तत्र कुतः सौष्ठवं नाट्ये ॥ ७९३ ॥
काचिद्वलिनाक्रान्ता काचिन्न जहाति कामिनं रुचिरम् ।
अन्या पानकगोष्ठ्यां नयति दिनं प्रीतकैः सार्धम् ॥ ७९४ ॥
नोत्सृजति सततमेका पुरुषागमनाशया गृहद्वारम् ।
शूलापालः कथयति लब्धोत्कोचो रजस्वलामपराम् ॥ ७९५ ॥

१ 'या यत्पुरा' इति मु० पा० । २ 'रामे' इति मु० पा० ।
३ 'गेय' इति मु० पा० । ४ 'नु' इति मु० पा० ।
५ 'सोवाचजनतयो वणिग्जने नेतरोपत्रपात्राणि। गाथायनं दास्यास्ये तत्र कुतः सौष्ठवं नाट्ये' इति मु० पा० ।

रंगगतापि चुद्रा शृणोति यदि[1] परिचितं गृहायातम् ।
उद्दिश्य चापि कार्यं व्रजति ततः प्रकृतमुत्सृज्य ॥ ७९६ ॥
आतारुण्योद्भेदात्कान्ते दृष्टिर्यया[2] न्यस्ता ।
सामाजिकमध्यस्था सा[3] कथमन्यासु याति परभागम् ॥ ७९७ ॥
चेतो[4]वशिता सत्त्व सत्त्वे सति चारुता प्रयोगस्य ।
न भवति सा वेश्यानामन्या[5]पि पुरुषहृतहृदयानाम् ॥ ७९८ ॥
वयमपि देवनिकेतनमनङ्गहर्षे गते त्रिद[6]शलोकम् ।
आश्रितवंतो[7]ऽगत्या तीर्थस्थानानुरोधेन ॥ ७९९ ॥
इह तु कदाचित्किंचिद्वृत्तिनिरोधाभिशंकया निरुत्सा[8]हा ।
रत्नावल्यामेता विदधति करपादविक्षेपम् ॥ ८०० ॥
[9]वत्सेशभूमिकास्था इयमनुकुरुते नरेश्वरवयस्यम्
वासवदत्ताच[10]रितप्रयोगमेषा विडम्बयति ॥ ८०१ ॥
[11]उद्यमसाहित्यवशाच्छोभातिशयेन मदनुबन्धेन ।
अनया प्रसिद्धिराप्ता सिंहलराजात्मजानुकृतौ ॥ ८०२ ॥
विविधस्थानकरचनां परिक्रमं गात्रचलनलालित्यम ।
काकुविभक्तार्थगिरो रसपुष्टिं वासनास्थैर्यम् ॥ ८०३ ॥

१ 'यत्परि' इति मु॰ पा॰ ।
२ 'येथा' इति मु॰ पा॰ ।
३ 'कथमन्या समुपयाति' इति मु॰ पा॰ ।
४ 'चेतोंतरा' इति मु॰ पा॰ ।
५ 'नां मध्याभिषपुरुषनिह्नितहृदयानाम्' इति ब॰ पा॰ ।
६ 'त्रिदिव' इति मु॰ पा॰ ।
७ 'तो गत्वा' इति मु॰ पा॰ ।
८ 'त्साहा' इति मु॰ पा॰ ।
९ 'वत्सेश्वरभूमिकयोर्द्वयमनुकुरुते नरेश्वर वयस्य' इति मु॰ पा॰ ।
१० 'द्वितय' इति मु॰ पा॰ ।
११ 'असमादिव्येवं शोभातिशयेन मदनुबन्धेन' इति मु॰ पा॰ ।

सात्त्विकभावोन्मीलनमभिनयमनुरूपवर्तनाभरणम् ।
मिश्रामिश्रे [1]वाद्ये लयाच्युतिं वर्णयंति सजर्याः ॥ ८०४ ॥
(यु[2]गलकम्)

एषाभिधानकीर्तन[3]गुणितस्वशरीरकुसुमशररोषा ।
सहृसोद्भिन्नमनोभवभावदशा सिंदुवारविवरेण ॥ ८०५ ॥
पश्यंती वत्सेश्वरमनुकार्यानु[4]करणभेदपरिमोषम् ।
माधुर्ध्वनिमुखराननसामाजिकजनमनःसु विदधाति ॥ ८०६ ॥
(युगलकम्)

वत्सपतिमालिखंती कामाव[5]स्थां क्रमेण भजमाना ।
वेपथुपुलकस्वेदैरावहति विसंष्ठुलं हृदयम् ॥ ८०७ ॥
मदृशेऽप्यनुभावगणे करुणरसं विप्रलम्भतो भिन्नम् ।
दर्शयति निरभिकाङ्क्षितमु[6]द्भ्वनगोचरापन्ना ॥ ८०८ ॥
तस्मि[7]न्निदर्शतीत्थं मंजरिकां साभिलाषमवलोक्य ।
पस्पर्श राजपुत्रः किम[8]सामिति वेत्रदण्डेन ॥ ८०९ ॥
बुद्ध्वाथ तस्य भावं प्रसा[9]रयन्युवतिसंकथाकेलिम् ।
न्यक्कुर्वन्वारवधूः सचिवः प्रशशंस बन्धकीगमनम् ॥ ८१० ॥
दाररतिः संततये व्याधिप्रशमाय चेटिकाश्लेषः ।
तत्खलु सुरतं सुरत कृच्छ्रप्राप्यं यदन्यनारीषु ॥ ८११ ॥

---

१ 'नाद्ये लयच्युति वर्णयंच' इति मु० पा० । २ मुद्रितपुस्तके नास्ति ।
३ 'नाशितशरीरकुसुमशरदोषं' इति ब० पा० ।
४ 'क्षतिरसस्वपरितोषम्' इति मु० पा० । ५ 'स्थाक्रमेण' इति मु० पा० ।
६ 'सौख्यं ननु गोचरापन्ना' इति मु० पा० । ७ 'अस्मिन्दर्शयती' इति मु० पा० ।
८ 'किमु मामिति' इति मु० पा० । ९ 'सशमय' इति मु० पा० ।

स्वव्यापारैकमतेः[1] परचिंता[2] नास्ति मे कदाचिदपि ।
पश्यन्त्याः स्वामीदृशमस्य तु मे मानसं व्यथितम् ॥ ८१२ ॥
यदि वेद्मि तस्य वसतिं सामर्थ्यं यदि भवेत्ततोऽप्यधिकम् ।
तद्गत्वा दग्धविधिं [3]लगुडैः संचूर्णयिष्यामि ॥ ८१३ ॥
वपुरिदमनुपममीदृग्यदि विहितं [4]तव कृशांगि हतधात्रा ।
अनु[5]रूपरमणविरहात्किमिति कृतं वन्ध्यजन्मफलम् ॥ ८१४ ॥
शैशवमस्तु जरा वा व्याधिर्वाह्यिन्द्रियप्रणाशो वा ।
[6]स्वाकारं तारुण्यं न तु [7]कुपतिकदर्थनाग्रस्तम् ॥ ८१५ ॥
केलिः प्रदहति [8]मज्जां शृंगारोऽस्थीनि चाटवः प्राणान् ।
न करोति मनस्तुष्टिं दानमभव्यस्य भर्तुः ॥ ८१६ ॥
कुत आगतासि कस्मिन्वेलासि निर्गता क्व वा किमर्थमिति ।
पृच्छन्नस्वस्थमना जनयति [9]गेही शिरःशूलम् ॥ ८१७ ॥
यदि भवति दैवयोगाच्चक्षुर्विषये[10] समुज्ज्वलस्तरुणः ।
तत्रात्मानं क्षपयति जायां च रटन्गृहस्वामी ॥ ८१८ ॥
सविवादे परलोके जनापवादे च जगति बहुवादे[11] ।
दैवाधीने [12]प्रणये न विदग्धा हारयंति तारुण्यम् ॥ ८१९ ॥

१ 'तेः' इति मु० पा० ।
२ 'परचिन्तार्था न काचिदप्यस्ति' इति मु० पा०
३ 'न शुभैः सचूर्णयाम्यधुना' इति मु० पा० ।
४ 'तेन ते धात्रा' इति मु० पा०
५ 'अधुनापि' इति मु० पा० ।
६ 'आकाराज्ञारुण्य' इति मु० पा० ।
७ 'कुपति कदर्थनाग्रस्तम्' इति मु० पा० ।
८ 'मज्ज्ञः' इति मु० पा० ।
९ 'रोगी इति मु० पा० ।
१० 'यः' इति मु० पा० ।
११ 'मित्रे' इति ब० पा० ।
१२ 'ण' इति मु० पा० ।

दुर्भरकरास्फालनमलिनीक्रियमाणशोभमनुदिवसम् ।
तुङ्गमपि पतितकल्पं स्तनशालिनि [1]तव पयोधरद्वन्द्वम् ॥ ८२० ॥
पर्यङ्कः स्वास्तरणः पतिरनुकूलो मनोहरं सदनम् ।
[2]तुलयंति न लवांशं त्वरितचणचौर्यसुरतस्य ॥ ८२१ ॥
[3]सहसा संकटवर्त्मन्यवितर्कितसंमुखागतेना[4]पि ।
अभिलषितेनोद्दृष्टकमनल्पशुभकर्मणा[5] लभ्यम् ॥ ८२२ ॥
प्रीतिः किल निरतिशया [6]स्वर्गः परलोकचिन्तकैर्गदितः[7] ।
तस्यास्तु जन्मलाभो हृदयेप्सितपुरुषसंयोगात् ॥ ८२३ ॥
अतटस्थस्वादफलग्रहणव्यवसायनिश्चयो येषाम् ।
ते शोकक्लेशरुजां केवलमुपयांति पात्रतां मन्दाः ॥ ८२४ ॥
किं प्रतिकूला ग्रहगतिरुत परिणत[8]मन्यजन्मदुश्चरितम् ।
स्वानुष्ठाना[9]भ्यमनं किं वा तस्यात्मयोनिहतकस्य ॥ ८२५ ॥
येन [10]तपस्वी स युवा स्तौति [11]समीरं त्वदंगसंस्पृष्टम् ।
त्वत्पादाक्रान्तभुवे स्पृहयति ककुभं [12]त्वदाश्रितां नमति ॥ ८२६ ॥
ध्यायति युष्मद्रूपं [13]त्वन्नामकवर्णमालिकां जपति ।
एकाग्रो[14]ऽन्तचेतास्त्वदङ्गतः सौख्यसिद्धिमभिकांक्षन् ॥ ८२७ ॥

( अंतर्विंश[15]षकम् )

१ 'तत्र' इति मु० पा० । २ तुलयति नहि लवांश' इति मु० पा० ।
३ 'विशा' इति ब० पा० । ४ 'न्य' इति ब० पा० । ५ 'णां' इति ब० पा०
६ 'नेदु' इति मु० पा० । ७ 'ता' इति मु० पा० ।
८ 'मात्मदुश्चरितम्' इति मु० पा० । ९ 'नत्र' इति मु० पा० ।
१० 'वरस्त्रीषु' इति मु० पा० । ११ 'शरीरं' इति मु० पा० ।
१२ 'त्वदीप्सितां' इति मु० पा० । १३ 'कमंच' इति मु० पा० ।
१४ 'त्मो' इति मु० पा० । १५ 'अंतर्युगलकम्' इति मु० पा० ।

उत्सृष्टसर्वकार्यस्तिर्यग्ग्रीवं विलोकयन्भवती[१]म् ।
कुरुते गृहाग्ररथ्यां यातायातैः शतावर्ताम् ॥ ८२८ ॥
दृष्टोऽसि तया सुचिरं गेहाभ्याशे परिभ्रमन्स्पृहया ।
मद्देश एष दत्तः प्राभृतमेतत्तव[२] प्रहितम् ॥ ८२९ ॥
शुष्यति मालभमाना भवत्कृते वेश्मनिर्गमावसरम् ।
इति चतुरशठस्त्रीभिर्विलुप्यते त्वदुपदेशेन ॥ ८३० ॥

( अन्त्ययुगलकम् )

किं वा कथितैरधिकैरस्थानाविष्टचेतसस्तस्याः[३] ।
अनुतिष्ठ यथायुक्तं [४]त्वत्तो [५]नाशस्तु जीवरक्षा च ॥ ८३१ ॥

( दूतीवचनं महाकुलकम् )

कुलपतनं जनगर्हां नरकगतिं प्राणितव्यसन्देहम् ।
अङ्गीकरोति तत्क्षणमबला परपुरुषमभियान्ती ॥ ८३२ ॥
स तु लिखति दासपत्रं त्यजति कुटुम्बं ददाति सर्व[६]स्वम् ।
यावन्न भवति पुरतः परयुवतिः प्रोज्झितावरणा ॥ ८४३ ॥
दृष्टं यद्द्रष्टव्यं व्यपयात कौतुकं विदितमन्तः ।
इति याति मनसि कृत्वा विहितविधेयस्ततस्तूर्णम् ॥ ८३४ ॥
सापि स्फिक्स्फोटनगृहीतमुक्ता विलोकयन्त्याशाः ।
विशति गृहं मंत्रस्ता सर्वत आशङ्किता सवैलक्ष्य[७]म् ॥ ८३५ ॥

---

१ भवति' इति मु० पा० । २ 'मया दत्तम्' इति मु० पा० ।
३ 'स्य' इति ब० पा० । ४ 'शोभा' इति मु० पा० ।
५ 'शठ' इति मु० पा० । ६ 'सर्व च' इति मु० पा० ।
७ 'क्ष्या' इति ब० पा० ।

नवचारित्रभ्रंशा[1] सुरचितकुलटोदितेषु नो निपुणा ।
पृष्टा क्व गतासि त्वं न क्वचिदिति सम्भ्रमाद्ब्रूते ॥ ८३६ ॥

एते[2] दोषा बहवः पुरुषा अपि चपलकौतुकाः[3] प्रायः ।
त्वं च ग्रहेण लग्ना कार्यविमूढात्र तिष्ठामि ॥ ८३७ ॥

इति दोलायितहृदया स्थिरीकृता[4]भ्यस्तकर्मणा दूत्या ।
दृष्टे[5]ति शंकमाना पदे पदे चलति पर्णेऽपि ॥ ८३८ ॥

सर्वत्र[6] विक्षिपन्ती मुहु[7]र्मुहुश्चकिततरलिते नेत्रे ।
प्राप्ता संकेतभुवं शतगुणितमनोरथाकृष्टा ॥ ८३९ ॥

भयशृंगारव्रीडामिश्रीभूतानुभावसन्दो[8]हम् ।
जनयती लोलांशुकदृ[9]ष्टादृष्टांसकुचनाभिः ॥ ८४० ॥

नीवीश्लथनारम्भं[10] निरुन्धती न[11] न न यामि यामीति ।
निभृ[12]तास्फुटाभिधानैः पल्लवयंती स्मरस्य कर्तव्यम् ॥ ८४१ ॥

नयतीवा[13]न्तर्विलयं ग्रसमाना[14] सर्वगात्राणि ।
यं[15] श्लिष्यतेऽन्ययोषा तिकं तस्यामृतं पुरतः ॥ ८४२ ॥

(नायिकावचनं महाकुलकम् ।

१ 'शात्सु...' इति ब० पा० ।
२ 'मितदोषे बहुदोषाः' इति मु० पा० ।
३ 'कप्रायाः' इति मु० पा० ।
४ 'ता न्य ...' इति मु० पा० ।
५ 'ष्टाभिशङ्क ...' इति मु० पा० ।
६ 'अनुदिक्षु' इति मु० पा० ।
७ 'पदे पदे' इति मु० पा० ।
८ "न्देहम्' इति मु० पा० ।
९ 'ध्रुतकृतिकृष्टा सकुचनाभिः' इति मु० पा० ।
१० 'म्भं' इति मु० पा० ।
११ 'तं न यामि यामीति' इति मु० पा० ।
१२ 'ह्नि' इति मु० पा० ।
१३ 'लेर्विनयं' इति मु० पा० ।
१४ 'ने वार्धसर्व...' इति मु० पा० ।
१५ 'संश्लिष्यते' इति मु० पा० ।

न कृतं तव रहसि [1]पुरो वा व्याहृतकण्ठकुण्ठया वाचा ।
गेहस्वामितिरस्कृतिनिष्पादितदुःखवेगनिर्वहणम् ॥ ८४३ ॥

उपधानीकृत्य भुजावन्योन्यं निर्विशंकमावाभ्याम् ।
संवलि[2]तोरु न सुप्तं शिथिलाङ्गं रतिविमर्दखिन्नाभ्याम् ॥ ८४४ ॥

आत्मगृहादानीतं प्रच्छाद्य स्वादुभोजनं विजने ।
स्वकरेण मया दत्तं निर्वृतहृदयेन नाशितं भवता ॥ ८४५ ॥

न कृता चरित्ररक्षा न च भुक्तं [3]त्वच्छरीरमपर्यन्तम् ।
दृष्टादृष्टभ्रष्टा क्व यामि किं वा करोमि दुर्जाता ॥ ८४६ ॥

अवगुण्ठनवि[4]नयरतौ स्वैरालापं च मन्दसंचारम् ।
सम्प्रति मम पापायाः करपिहितमुखा हसन्ति तत्त्व[5]ज्ञाः ॥ ८४७ ॥

यासामासीत्सख्यं मया समं समवयःकुलस्त्रीणाम् ।
ता वारयन्ति मत्तः कु[6]सङ्ग इति तन्नियन्तारः ॥ ८४८ ॥

धिक्वादान्परिजनतः सहमाना [7]मन्युरोधनतवदना ।
तिष्ठामि निरभिमाना निजनिर्मितदोषदौर्बल्यात् ॥ ८४९ ॥

सद्भिर्विधीयमानं प्रसङ्गपतितं पतिव्रतास्तवनम् ।
हृदयेन दूयमाना मूढा सीदामि शृण्वन्ती ॥ ८५० ॥

आसन्न उपविशन्तीं मन्दा[8]क्षा मां निषेद्धुमसमर्थाः ।
अन्योन्यमीक्षमाणा ज्ञातिजनाः सङ्कुचन्ति भुञ्जानाः ॥ ८५१ ॥

---

१ 'तो वा विहृतकम्पया' इति मु॰ पा॰ ।   २ 'रि' इति मु॰ पा॰ ।
३ 'मच्छरीरपर्यन्तम्' इति मु॰ पा॰ ।   ४ 'नयविरति' इति मु॰ पा॰ ।
५ 'भूमिज्ञाः' इति ब॰ पा॰   ६ 'कुसंगतिं तन्नियन्तारः' इति मु॰ पा॰ ।
७ 'मुकुरथाप्यधोवदना' इति मु॰ पा॰ ।   ८ 'मां दाक्षिण्यान्नियंतु' इति मु॰ पा॰ ।

प्रकटीकृता[1]स्त्वयैवं क्षणमात्रममुञ्चता गृहोपान्तम् ।
अस्मासु[2] दृशं मग्नां प्रेमस्निग्धाम[3]नुद्धरता ॥ ८५२ ॥

परगृहविनाशपिशुनाः सुभगंमन्याभिरूपकृतदर्पाः ।
कृकलासतुल्यरा[4]गा भवन्ति युष्मद्विधा एव ॥ ८५३ ॥

अनभीष्टव्यवहारप्रभवशुचा[5] पीडिताक्षरा इत्थम् ।
सोपालम्भा विज[6]ने धन्याः शृण्वन्ति बन्धकीवाचः ॥ ८५४ ॥

(कुलकम्)

परतरुणीम[7]ङ्गावलेहार्पितनयनभागदृष्टस्य ।
वेश्यारचितविलासाः कथिताः पुरतः पुराणतृणतुल्याः ॥ ८५५ ॥

उपव[8]नरचितमहोत्सव आराधितदेवताविशेषाणाम् ।
वचनमपि प्रेमार्द्रं स्वैरिण्याः श्रवणमेति पुण्यवताम् ॥ ८५६ ॥

का गणना विषय[9]वशे पुंसि वराके [10]पराङ्गनास्पृहया ।
व्याजेन वीक्षमाणा ध्यानधियां स्पृशति सज्ज्ञानम् ॥ ८५७ ॥

शिरसा रचिताञ्जलयो दधति निदेशं त्रिविष्टपे गणिकाः ।
परदाररसाकृष्टस्तथापि भेजे शचीपतिरहल्याम् ॥ ८५८ ॥

अप्सरसः किं न वशा वैदग्ध्यवतां च किं न धौरेयः ।
येन चकारासक्तिं गोविन्दो गोपदारेषु ॥ ८५९ ॥

---

१ 'सा त्वयैवं' इति ब० पा० । २ 'स्सुहृदशां मध्ये' इति मु० पा० ।
३ 'न' इति मु० पा० । ४ 'भागा' इति मु० पा० ।
५ 'वषा' इति मु० पा० । ६ 'वचनं' इति मु० पा० ।
७ 'सम्भार' इति मु० पा० । ८ 'उपनयति रतिमहोत्सवमा' इति मु० पा० ।
९ 'विषमरसे' इति ब० पा० । १० 'वरा' इति मु० पा० ।

त्रैलोक्यगता वेश्याः स्वाधीना यातुधाननाथस्य ।
तदपि जहार कलत्रं दशरथतनयस्य रामस्य[१] ॥ ८६० ॥
अथ मञ्जर्या जननी निजपक्षसमर्थने कृतोत्साहा ।
आक्षेप्तुमाचचक्षे नृपसुतसचिवाश्रितां[२] वाचम् ॥ ८६१ ॥
घटयुवतिषु प्रगल्भो [३]नागरिकादर्शनच्युतपुंस्त्वः ।
ग्रामोषितोऽविदग्धो निन्दति गणिकां भवद्विधोऽवश्यम् ॥ ८६२ ॥
नार्द्रयति मनः पुंसामवगाहितमीनकेतु[४]शास्त्राणाम् ।
नखदशनक्षतहीनं जीवत्पतिबन्धकीसुरतम् ॥ ८६३ ॥
स्थापय घटकं तावत्कुरु भूमितले तृणैः समास्तरणम् ।
सुरतोपक्रम ईदृक्[५] प्रायो ग्रामीणतरुणमिथुनानाम् ॥ ८६४ ॥
बहलोशीरविलिप्तः[६] स्थितजूटकको[७]णमल्लिकामाल्यः ।
पामरनार्या दृष्टः स्मरोऽहमिति मन्यते विटो[८] ग्राम्यः ॥ ८६५ ॥
गृहकर्मकृतायाम[९]प्रक्लिन्नां सलिलकार्यनिर्याताम् ।
उपपतिरुपैति हर्षाक्लिष्टागमे पामरीं प्राप्य ॥ ८६६ ॥
कूप[१०]क्षिप्तघटाया नार्यास्तत्काष्ठनिहितचरणायाः ।
वलितग्रीवं वीक्षितमुन्म[११]यति मनो ग्रामवासिनां यूनाम् । ८६७॥

---

१ 'भद्रस्य' इति मु० पा० । २ 'तं वाक्यम्' इति ब० पा० ।
३ 'मा' इति मु० पा० । ४ 'मा स्त्रोणाम्' इति मु० पा० ।
५ 'ग्रामीणकनवषणमिथुनानाम्' इति मु० पा० ।
६ 'लुप्तस्थि' इति मु० पा० । ७ 'कवच' इति मु० पा० ।
८ 'टग्राम्यः' इति मु० पा० । ९ 'सां प्र' इति मु० पा० ।
१० 'कूपावतारितघटाया नार्याः काष्ठ ...' इति ब० पा० ।
११ 'मति ग्रामवासिनो यूनः' मु० पा० ।

लग्नोऽस्मि यत्र गात्रे कथमपि दैवेन देवयात्रायाम् ।
अद्यापि तन्न मुञ्चति पुलकोद्गमकण्टकं तस्याः ॥ ८६८ ॥

उच्चेतुं [1]कर्पासं प्रविष्टया गहन[2]वाटिकां शून्याम् ।
टंकारितेन संज्ञा कृता तया त्वं तु[3] वेत्सि नो मूर्खः ॥ ८६९ ॥

आलिंगितमुसलायास्त्वय्येव निविष्ट[4]चक्षुषस्तस्याः ।
आवृत्त्या भ्रमति पुरो जातः खलु शालिक[5]ण्डने विघ्नः ॥ ८७० ॥

त्वां लो[6]ष्टमाक्षिपन्तं पार्श्वस्थैः स्तूयमानसामर्थ्यम् ।
गृहकर्तव्यं त्यक्त्वा [7]साऽपश्यद्द्वारटरन्ध्रेण ॥ ८७१ ॥

त्वयि मार्गनि[8]कटवर्तिन्यविचेतितखेदया तया सुभग ।
प्रत्यासन्नगृहेष्वपि कृतः प्रसह्य स्मरातुरो लोकः ॥ ८७२ ॥

इति चतुरदूतिकोदित[8]वर्धितसौभाग्यगर्वपूर्णस्य ।
ऊर्मिसहस्रोन्नमितं भवति मनो ग्राम्यषि[9]ङ्गस्य ॥ ८७३ ॥

विनिवार्य तत्प्रवर्तितवाक्य[10]विकासं नतोत्तमाङ्गेन ।
श्रीसिंहभटस्य सुत[11] समुवाच वचोऽथ नर्तकाचार्यः[12] ॥ ८७४ ॥

नायकभूमौ भवतः कुशीलवाः कोहलादयो मुनयः ।
अप्सरसः स्त्रीला[13]स्ये गा[14]न्धर्वे कमलजन्मनस्तनयः ॥ ८७५ ॥

---

१ 'का' इति मु॰ पा॰ । २ 'शून्यवाटिकागहनम्' इति मु॰ पा॰ ।
३ 'च' इति मु॰ पा॰ । ४ 'चेतस' इति मु॰ पा॰ ।
५ 'ख' इति ब॰ पा॰ । ६ 'बिल्वक क्षिपत' इति ब॰ पा॰ ।
७ 'पश्यति सा द्वाररंध्रेण' इति मु॰ पा॰ ८ 'त उपचित...' इति मु॰ पा॰ ।
९ 'खिन्न' इति मु॰ पा॰ । १० 'च' इयि मु॰ पा॰ ।
११ 'तः' इति मु॰ पा॰ । १२ 'र्यम्' इति मु॰ पा॰ ।
१३ 'नाट्ये' इति ब॰ पा॰ । १४ 'गन्धर्वः कम...' इति ब॰ पा॰ ।

सुषिरस्वरप्रयोगे[1] प्रतिपादनपण्डितो मतङ्गमुनिः।
यदि रञ्ज[2]यन्ति हृदयं भवतो भूमि[3]स्पृशां कुतः शक्तिः॥ ८७६॥
अभ्यधिकं धृष्टत्वं प्रायेण हि शिल्पजीविनो भवति।
आश्रितनर्तकवृत्तेर्विशेषतो विजितरङ्गस्य॥ ८७७॥
विज्ञापयाम्यतस्त्वां निर्मित[4]नाट्यप्रजासृजा मदृशम्।
अवलोकयाङ्कमेकं मा भवतु मम श्रमो वन्ध्यः॥ ८७८॥
इति कथयन्नरभर्तुः पुत्रेण स चोदितो भृ[5]वोन्नतया।
रचिते सकलातोद्ये नियोजयामास सू[6]त्रधृतम्॥ ८७९॥
वांशिकदत्तस्थानक[7] उद्गाहितभिन्नपंचमे सम्यक्।
प्रावेशिक्या[8] ध्रुवया द्विपदे[9] ग्रहणान्तरे[10] ऽविशत्सूत्री॥ ८८०॥
उत्साहभावयुक्तः सामाजिकहृदयरंजनं कु[11]र्वन्।
कविनैपुणवत्सेश्वरचरित[12]स्वविधेयदाक्ष्यसामग्र्या॥ ८८१॥
अष्टकलापरिमाणां ध्रुवां[13] परिक्रम्य तालसययुक्ताम्।
आहूय नटीं कृत्वा तया समं स्वगृहकार्यसंलापम्॥ ८८२॥
सूचितपात्रागमनः किंचिद्गत्वा पदानि ल[14]लितानि।

१ 'शप्रतिपादन...' इति ब० पा०।
२ ३ 'यदि रंजयति भवतो भूमिं स्पृशतां' इति मु० पा०।
४ 'नरेन्द्रनाट्यजामदृशम्' इति मु० पा०। ५ 'भु' इति मु० पा०।
६ 'च प्रकृतम्' इति मु० पा०। ७ 'कलङ्कावित' इति मु० पा०।
८ 'श्रवमाने' इति मु० पा०। ९ 'दोष' इति मु० पा०।
१० 'रे विशति सूत्रीम्' इति मु० पा०। ११ 'कुर्वत्' इति मु० पा०
१२ 'तस्य विधे...' इति मु० पा०।
१३ 'च परिकल्प्य तानलययुक्ताम्' इति मु० पा०।
१४ 'निपुणानि' इति मु० पा०।

निश्चक्राम गृहिण्या सार्धं निःसरणगीतेन ॥ ८८३ ॥
आश्रित्य [१]कथोद्घातं प्रविवेश ततः[२] सविस्मयोऽमात्यः ।
दु[३]र्घटसंघटनेन क्षितिनाथस्योदयेन मुदितस्य ॥ ८८४ ॥
प्रासादमारुहन्तं कुसुमायुधपर्वचर्चरी द्रष्टुम् ।
निर्दिश्य वत्सराजं समनंतरकार्यसिद्धये निरगात् ॥ ८८५ ॥
अथ[४] विशति स्म नरेन्द्रः प्रासादगतः समं वयस्येन ।
अवलोकयन्प्रमो[५]दं [६]प्रमुदितचेताः स्वसै[७]न्यसम्पत्त्या ॥ ८८६ ॥
विस्मयभावाक्रष्टः प्रोत्फुल्लविलोचने ततो विसृजन् ।
नृत्यति पौरजनौघे प्रोवाच वयस्य पश्य पश्येति ॥ ८८७ ॥
तुल्यशिशुतरुणवृद्धं समगुप्तागुप्तयुवतिपरिचेष्टम् ।
अगणितवाच्यावाच्यं क्रीडन्ति[८] जनाः प्रवृद्धहर्षरसाः ॥ ८८८ ॥
पिष्टातकपिंजरितं रचि[९]तोचितविविधकुसुमनिर्यूहम् ।
गाथायासंसमुत्थितबहुनिःश्वासप्रकीर्णपद[१०]गीतम् ॥ ८८९ ॥
तूर्यरवव्यामिश्रितकरत[११]लतालोद्भुजं प्रनृत्यन्तम् ।
मुहु[१२]रपि जातस्खलनं संदर्शितदार्ढ्यसौष्ठवे [१३]स्थविरम् ॥ ८९० ॥

---

१ 'पदो' इति मु० पा० । २ 'तस०' इति मु० पा० ।
३ 'दुर्घटघटनेन क्षितिनाथस्योदय नसुदिश्य' इति मु० पा० ।
४ विशयंति । ५ 'प्रगाढ' इति मु० पा० ।
६ 'स' इति मु० पा० । ७ 'सैन्य' इति मु० पा० ।
८ 'क्रीडति जनता प्रवृद्धहर्षरसा' इति मु० पा० ।
९ 'रुचिरोच्छ्रित' इति मु० पा० । १० 'पटवासम्' इति मु० पा०
११ 'तालैरनुजनं प्रनृत्यंतम्' इति मु० पा० ।
१२ 'रुपवत्स्खलन' इति मु० पा० । १३ 'सुचिरम्' इति मु० पा० ।

अस्तु वसन्तः सततं स्वाधीनाभीष्टजनसमाश्लेषः[1] ।
इति गायन्ती रभसादालिंगति मदवशात्तरुणी ॥ ८९१ ॥
क्रीडन्त्या भ्रमरहितं शृंगकसलिलेन ताडितस्तरुणः ।
सीमंतिन्या ग[2]णयति तुष्टात्मा सुभगमात्मानम् ॥ ८९२ ॥
भग्ने लज्जासेतौ पर्वविसरेण कुलवधूवदनात् ।
अश्ली[3]लोक्तिजलौघो[4] निर्यातः केन वार्यते प्रसरन् ॥ ८९३ ॥
तुल्यव्यापारगिरां ललनानां देवनप्रसक्तानाम् ।
आर्यानार्यविगमं वद[5]नाहृतिजालिका कुरुते ॥ ८९४ ॥
अथ सहचरनिर्दिष्टे मद[6]स्खलच्चरणविघटिताभिनयम् ।
वासवदत्ताप्रहिते नृत्यत्यौ [7]विविशतुश्चेत्यौ ॥ ८९५ ॥
दर्शितसरोजवर्तनसा[8]म्याभिनये शरेऽभि[9]नेतव्ये ।
वि[10]दधाने वीरदृ[11]शावायुधमात्रं[12] समाश्रित्य ॥ ८९६ ॥
चलितनयनप्रवृत्तिः कौतुकहृतमानसो नराधिपतिः ।
निजगाद निर्भरमहो क्रीडितमनयोर्विलासिन्योः ॥ ८९७ ॥
करपीडनोपमर्दव्यतिकरसम[13]ये कदर्थ्यमानोऽपि ।
स्तनमंडले स्थितोऽहं त्वं पुनराकृष्य कुत्रचित्क्षिप्तः ॥ ८९८ ॥

---

१ 'षात्' इति मु० पा० ।
२ 'गायति' इति मु० पा० । ३ 'अम्लानो' इति मु० पा०
४ 'घे निर्याते केन वार्यते प्रसरः' इति ब० पा० ।
५ 'मदनाहृतिजापिका' इति मु० पा०
६ 'मदप्युरणाघटितानिनयना' इति मु० पा० । ७ 'प्रविशत' इति मु० पा० ।
८ 'मात्रा' इति मु० पा० । ९ 'त्ति' इति मु० पा० ।
१० 'नि' इति मु० पा० । ११ 'दशासा' इति मु० पा० ।
१२ 'त्रां' इति मु० पा० । १३ 'समकद...' इति मु० पा० ।

अधुना[1]न्तरयसि मामिति कोपादिव बाणवारमभिराम[2]म् ।
वकुलविचपदन्यासैर्व[3]लगत्या हंति हार उच्छ[4]लितः ॥ ९९९ ॥

चूतलता[5] धम्मिल्लस्थानच्युतशेखरं[6] दधौ श्लाघ्यम् ।
अच्युतपतन्नि[7]र्यूहं न त्व[8]षा मदनिकावेणीः ॥ ९०० ॥

स्तनभारावनतस्य प्रतनोर्मध्यस्य नास्ति तेऽपेक्षा ।
इत्थमिव पादलग्नौ क्रीडन्त्या नूपुरौ रसतः ॥ ९०१ ॥

वहति स्म यं[9] नितम्बं कथमपि कृच्छ्रेण[10] मंदसंचारा[11] ।
कलयति तं[12] तूललघुं जयति मनोजन्मनो महिमा ॥ ९०२ ॥

उदयनसमनुज्ञातः[13] प्र[14]ननर्त वसन्तकोऽपि मुदितात्मा ।
हास्य[15]चयाभिरामं चर्चरि[16]तालेन तन्मध्ये ॥ ९०३ ॥

धीरोद्धतललितपदैः[17] क्रीडित्वा ते चिराय नरनाथम् ।
प्रद्योतस्य सुतायाः सन्देशमथोचतुः समुपगम्य ॥ ९०४ ॥

आदिशति देव देवीत्यर्धोक्ते[18] सलज्जमन्योन्यम् ।
अवलोक्य मुखं नहि नहि विज्ञापयति प्रणम्य विनयेन ॥ ९०५ ॥

मकरध्वजस्य पूजां त्वत्पादसरोजसन्निधौ कर्तुम् ।
पृथिवीमण्डलमण्डन समीहते मे मनोवृत्तिः ॥ ९०६ ॥

---

१ 'त्व' इति मु° पा° । २ 'माम्' इति मु° पा° ।
३ 'वदत्या' इति मु° पा° । ४ 'च्च' इति ब° पा° ।
५ 'ताधम्मिल्लस्थान...' इति मु° पा° । ६ 'रेम्ब्वे' इति मु° पा° ।
७ 'नि' इति मु° पा° । ८ 'च समदनिका वाणीम्' इति मु° पा°
९ 'यानि तत्त्व' इति मु° पा° । १० 'सपाणिकृच्छ्रेण' इति मु° पा° ।
११ 'रम्' इति मु° पा° । १२ 'तन्नूनमय' इति मु° पा° ।
१३ 'तो' इति मु° पा° । १४ 'नयमन्नर्तं' इति मु° पा° ।
१५ 'दास्योन्नया' इति मु° पा° । १६ 'कार्श्येन' इति मु° पा° ।
१७ 'रैः' इति मु° पा° । १८ 'क्त्वचः स...' इति ब° पा° ।

प्रियरतिभोगो मदनो दयितवसन्तो जनस्य [1]मनसि वसन् ।
भावेन भवान्पूज्यो लोकस्थित्या तु कुसुमशरपाणिः ॥ ८०७ ॥

इति दत्त्वा संदेशं प्रकृतिवयःकालसमुचितं भ्रान्त्वा ।
ते मदमदनाविष्टे बभूवतुर्जवनिकान्तरिते ॥ ८०८ ॥

अपनीततिरस्करिणी ततोऽभवन्नृपसुता समं चेथ्या ।
अविदितरत्नावल्या पूजोचि[2]तवस्तुहस्तयानुगता ॥ ८०९ ॥

अथ दृ[3]ष्ट्वा सागरिकां प्रमादितां[4] परिजनस्य निन्दित्वा ।
कांचनमालामवदन्नृपमहिषी जातसंक्षोभा ॥ ८१० ॥

प्रेषय कन्यामेनामवरोधं त्वं गृहाण कुसुमादि ।
यावन्न भवति विषये वीक्षणयोर्भूमिनाथस्य ॥ ८११ ॥

उपगम्य ततश्चेटी तामभ्यवदत्क्रिमर्थमायाता ।
मेधाविनीं विमुच्य व्रज तस्मिन्मा विलम्बस्व ॥ ८१२ ॥

विहिते देव्यादेशे मनसीदं संनि[5]धाय सा तस्थौ ।
विहगी सुसंगताया हस्ते निहिता[6] मनोभवसपर्याम् ॥ ८१३ ॥

अवलोकयामि तावत्तिरोहिता सिंदुवारविटपेन ।
तातान्तःपुरिकाभिर्यथार्च्यते किं त[7]थैतदुत नेति ॥

स[8]न्दानितकम् ॥ ८१४ ॥

---

१ 'मदसि वसनाम्' इति मु० पा० ।　२ 'दित' इति मु० पा० ।
३ 'मुद्धा' इति मु० पा० ।　४ 'दत' इति मु० पा० ।
५ 'वि' इति मु० पा० ।　६ 'दत्ता' इति मु० पा० ।
७ 'तथैव सो वेति' इति मु० पा० ।　८ मुद्रितपुस्तके न विद्यते ।

पिण्डीकृतमिव रागं हृच्छयमिव लब्धविग्रहोत्कर्षम् ।
समुपेत्य वत्सराजं जगाद सा जयतु[1] जयतु देव इति ॥ ८१५ ॥
परिभुक्तमपि नवलं शृङ्गाररसं मदनपर्वणानीतम ।
भजमानो भजमानां स्वागतवचसाभिनन्द्य तामूचे ॥ ८१६ ॥
भर्गविलोचनपावकदाहाभ्य[2]धिकां मनोभवो मन्ये ।
प्राप्स्यति तव करसङ्गमसुखविरहसमुत्थितां पीडाम् ॥ ८१७ ॥
अ[3]थ मन्मथमभ्यर्च्य चितिनाथं तदनु स[4]मधिकं तस्याम् ।
परमां मुदं वहन्त्यां विग्रहवन्मदनमनसि [5]कन्यायाम् ॥ ८१८ ॥
शृंगाररससमुद्रे सोत्कलिकं निपतिते तथा नृपतौ ।
तारमधुरस्फुटार्थं नग्नाचार्य: पपाठ नेपथ्ये ॥ ८१९ ॥ (युग[6]लकम्)
नयनानन्दमखण्डितमण्डलमभिराममम्तरश्मिमिव ।
मायंतन आस्थाने चितिपतयस्त[7]स्युरुदयनं द्रष्टुम् ॥ ८२० ॥
उच्चारितेऽ[8]थ नाम्नि चिदग्रम[9]तौ तत्क्षणं[10] व्यपेतायाम् ।
उत्पन्नविस्मयर[11]तिर्निदधे नरभर्तुरात्मजा हृदये ॥ ८२१ ॥
'अयमुदयनः स राजा तातः सत्कृत्य मां ददौ यस्मै[12] ।
हन्त परप्रेषणमपि न निष्फलं साम्प्रतं जातम् ॥ ८२२ ॥

---

१ 'जयति देव इति' इति मु० पा० । २ 'त्य' इति मु० पा० ।
३ 'सा' इति मु० पा० । ४ 'साधिक' इति मु० पा० ।
५ 'वन्मनसि कन्यायाम्' इति मु० पा० । ६ मुद्रितपुस्तके न दृश्यते
७ 'सन्त्युदयनं' इति मु० पा० । ८ 'ऽन्यनाम्नि' इति मु० पा० ।
९ 'पतौ' इति मु० पा० । १० 'तत्क्षणाच्युतपदायाम्' इति मु० पा० ।
११ 'परा मानं दधे' इति मु० पा० । १२ 'यस्मिन्' इति मु० पा० ।

यावन्न वेत्ति कश्चित्तावदितस्त्वरितमेव निर्यामि'।
इति कथमपि नायकतो हृत्वा दृशमुत्ससर्ज रङ्गभुवम् ॥ ९२३ ॥
कंदर्पमहमहोत्सवहृतहृदयैर्नावधारितोऽस्माभिः।
संध्यातिक्रमकालः पश्य त्वं प्रियवयस्यक तथाहि ॥ ९२४ ॥
उदयत[1]टान्तरितमियं प्राची सूचयति दिङ् निशानाथम्।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥ ९२५ ॥
देवि त्वन्मुखपद्मः पद्मान्विदधाति पश्य विच्छायान्।
अलयोऽपि लज्जिता इव शनैः शनैस्तदुदरेषु लीयन्ते ॥ ९२६ ॥
एवमभिधाय चित्रैश्चरणन्यासैः परिक्रमं कृत्वा।
निष्क्रामि[2]का ध्रुवया विनिर्ययौ नायकोऽपि सह सर्वैः ॥ ९२७ ॥
(कला[3]पकम्)

अंके जातसमाप्तौ गीतातोद्यध्वनौ च विश्रान्ते।
प्रेक्षणकगुणग्रहणं नृपसूनुः प्रववृते कर्तुम् ॥ ९२८ ॥
नाट्यप्रयोगतत्त्वे मतयो न विशन्ति मादृशां प्रायः।
वाहनयानपदातिग्रामादिककार्यदत्तहृदयानाम् ॥ ९२९ ॥
आस्ते लि[4]खितो ग्रामो गृहाण तं सप्रदेशवङ्कभूमिम्।
वासय दत्त्वा[5]वासं भवसि तत[6]श्छक्कुरो दिवसैः ॥ ९३० ॥
कृतजीवनसंस्थो हि त्वमपि किमर्थं करोषि विज्ञप्तिम्।
अर्पय वा यदि नेच्छसि कुरु स्थितिं हस्तदानेन ॥ ९३१ ॥

१ 'नगा' इति मु० पा०। २ 'मन्पादुकया' इति मु० पा०।
३ मुद्रितपुस्तके नास्ति।
४ 'ह्यालिखितोऽयं गृहाण सर्वं प्रदेशवङ्कभूमिम्' इति मु० पा०।
५ 'तन्नावासं' इति मु० पा०। ६ 'ततन्नक्कुरो' इति मु० पा०।

न च पत्तयो न मन्त्रिर्न च पोष्यजनस्तथाप्यसंतुष्टः ।
लभमानो[1]ऽपि मदायं चिरंतनत्वाभिमानेन ॥ ८३२ ॥

विज्ञप्तिकोन्मुखत्वं दूरत एवावधारितं भवतः ।
तूष्णीं क्रियतामस्माच्छ्रोष्यसि कार्यं प्रतीहारात् ॥ ८३३ ॥

यूयं कुटुम्बमध्ये क्व गण्यते गोत्रपुत्रसामान्य[2]म् ।
आदाय संविभागं गृह[3] एव स्थीयतां यथासौख्यम् ॥ ८३४ ॥

अभ्यन्तरव्यया[4]र्थं प्रविलम्बो यो मया महाद्रंगः ।
तत्रा[5]पि तेऽनुबन्धो नो जाने किं करोमीति ॥ ८३५ ॥

प्रथमत[6]रमेव कल्पितमनल्पफलजीवनं प्रदेशस्थम् ।
अद्यापि ते न जा[7]तं प्रयोगिनां पश्य मन्थरताम् ॥ ८३६ ॥

एवंप्रायैरनुदिनलाभोदयमोहकारिभिर्वचनैः ।
फलशून्यैरनुजीवी प्रतारितः कः कियत्कालम् ॥ ८३७ ॥

एतद्विषये[8] नैपुणमत्र तु भूमिज्ञ[9]तां समाश्रित्य ।
मुखरतया कथयामो जड[10]मतिसामाजिकोचितं किंचित् ॥ ८३८ ॥

---

१ 'मे' इति मु० पा० । २ 'न्याः' इति मु० पा० ।
३ 'स्वगृह इव स्थीयतां यथासौख्यम्' इति ब० पा० ।
४ 'येन विलम्बा यो महांस्तुङ्ग' इति मु० पा० ।
५ 'अत्रापि न न वचो मे' इति मु० पा० ।
६ 'प्रथमं चरमविकल्पितमल्पमपि कलजीवनप्रदेशस्थम्' इति मु० पा०
७ 'यातं नियोगितानां मदन्तरताम्' इति मु० पा० ।
८ 'मे' इति मु० पा० । ९ 'मौग्ध्यतां' इति मु० पा० ।
१० 'जडमिव' इति मु० पा० ।

समा[1]श्रयः स महात्मा शारीरस्त्रिःप्रमाणपरिमाणः ।
सत्त्वाधि[2]क्याज्ज्येष्ठो व्यस्तसमस्तैस्त्रिभिर्विनिष्पाद्यः ॥ ८ ३ ९ ॥
सुकुमा[3]राविद्धक्रिय उपरंजकरंजितो विविधनृत्तः ।
आदे[4]यस्त्वयमध्यैर्भावैः सम्पादितः प्रयोगोऽयम् ॥ ८ ४ ० ॥

(सन्दा[5]नितकम्)

गम्भीरमधुरशब्दं परिर[6]चितगीतविविध[7]भंगयुतम् ।
दर्शयतो[8] वैचित्र्यं न[9] भ्रष्टो वादकस्य लयकालः ॥ ८ ४ १ ॥
अप[10]रित्यक्तस्थानकरसकाकुव्यंजितस्फुटार्थपदम् ।
अभिरामाविश्रान्तं पठितं निरवद्य[11]मखिलभावयुतम् ॥ ८ ४ २ ॥
नियमितदीपनश[12]मनं द्रुतमध्यविलम्बिता[13]लसंयुक्तम् ।
रसवत्स्वरोपपन्नं कृ[14]तसाम्यं साधुगातृभिर्गीतम् ॥ ८ ४ ३ ॥
प्रकृतिविशेषावस्थाप्रतिपादकवेषरचनसामग्र्या ।
अनुकर[15]णमभ्यतीतं सिद्धिद्वयसम्पदाधा[16]रम् ॥ ८ ४ ४ ॥

---

१ 'समाश्रयः स महात्मा सशरीरस्त्रिः प्रमाणपरिमाणे' इति मु० पा० ।
२ 'यत्नाद्विलोक्य दृष्टा' इति मु० पा० ।
३ स्वर्गसाराधिक्यकियद्' इति मु० पा० ।
४ 'आदाय त्वममर्त्यैर्भावैः' इति मु० पा० । ५ मुद्रितपुस्तके नास्ति ।
६ 'बृंहित' इति मु० पा० । ७ 'मङ्ग' इति मु० पा० ।
८ 'ते' इति मु० पा० । ९ 'तद्रथवाद्यकस्तललकालः' इति मु० पा० ।
१० 'अविभक्तानद्यानस्य काकुपरस्यास्फुटापदम्' इति मु० पा० ।
११ 'निरवद्यभाषासु ॥' इति मु० पा० । १२ 'ग' इति मु० पा० ।
१३ 'तानलययुक्तम्' इति मु० पा० ।
१४ 'तत्साम्यं सादिभिर्विहितम्' इति मु० पा० ।
१५ 'अभिनयकरणे नीता' इति मु० पा० । १६ 'वा' इति मु० पा० ।

भरत[१]सुतैरुपदिष्टं चितिपतिनकुषावरोधनारीणाम्[२] ।
[३]मन्ये ता अपि नास्ये शोभामन्दोहमीदृशं[४] नापुः ॥ ९४५ ॥

[५]सुश्लिष्टसन्धिबन्धं सर्वत्र सु[६]वर्णयोजितं सुभ[७]गम् ।
निपुणपरीचकदृष्टं राजति रत्नावलीरत्नम् ॥ ९४६ ॥

एवंविधगुणकथन[८]प्रसंगिनि विभावितात्मनृपतनये ।
पठति स्मार्यामन्यः स्मृतिविषयमुपागतां प्रसङ्गेन ॥ ९४७ ॥

'संग्रामादनपसृतिः प्रेचाभिज्ञा सुभाषि[९]ताभिरतिः ।
आस्फोटनाभियोगः कुलविद्या राजपुत्राणाम्' ॥ ९४८ ॥

एतद्वस्तुनि या[१०]ते श्रुतिमार्गं नृपतिनन्दनो रभसः ।
आरब्ध[११]कथाच्छेदकमाखेटकवर्णनं चक्रे ॥ ९४९ ॥

चललक्ष्यवेधकौशलमस्वप्रजवे स्थिरासनाभ्यसनम् ।
भूमिविभागज्ञानं भवति मृगयाभियोगेन ॥ ९५० ॥

वहति जवेन तुरंगे निविडस्थितपादकटकपादाग्रः ।
तिर्यग्विनिहितकायो निम्नोन्नतमग्रतो भुवः पश्यन् ॥ ९५१ ॥

---

१ 'नवसुरते' इति मु० पा० ।
२ 'अनुषावबोधकाराणाम्' इति मु० पा० ।
३ 'ता अपि नाथे सर्वाः' इति मु० पा० । ४ 'सा' इति मु० पा० ।
५ 'या' इति मु० पा० । ६ 'सम्यानसुवर्षयो...' इति मु० पा० ।
७ 'सुतराम्' इति मु० पा० ।
८ 'नं यसदादिविभाभितार्था तं पतये' इति मु० पा० ।
९ 'वना' इति मु० पा० । १० 'जाते स्तुतिभाजां' ।
११ 'आरभ्य कथा...' इति मु० पा० ।

यावत्प्राणं धावत्याकुलिते विश्वकद्रुभिर्भीत्या ।
गोचरपतिते जीवे लघुक्रियः क्षिपति मार्गणं धन्यः ॥ ९५२ ॥
(संदानितकम्)

मूले स्थितस्य निभृतं मृगयुभिरुच्चाश्च ढौकितं निकटे ।
पातयतो मृगमुत्प्लुतमव्यपदेश्यं सुखं किमपि ॥ ९५३ ॥

गीतश्रवणोत्कर्णं निस्सृतदृणकवलगर्भमुखहरिणम् ।
उपवेशितमस्पन्दं स्पृहणीया एव मृग्यन्ति ॥ ९५४ ॥

दावानलसंतापान्निर्यांतं गहनवीरुधोऽभिमुखम् ।
यो निरुणद्धि स धन्यः सूकरमेकप्रहारेण ॥ ९५५ ॥

घनकच्चोदरसुप्तं समुपेत्य स्वैरमकृतपदशब्दम् ।
व्याधवर एव कुरुते निर्जीवं हेलया शशकम् ॥ ९५६ ॥

इति विदधति सिंहभटावाखेटकशक्तिलाघवश्लाघाम् ।
हृदयागतामगायत्प्रसंगतो गीतिकामपरः ॥ ९५७ ॥

'आस्तां व्यापाररसः प्रवर्तिता संकथापि मृगयायाः ।
अन्तरयति तन्मनसामाहारादिक्रियोचितं कालम्' ॥ ९५८ ॥

अवधार्य गीतिकार्थं दानं प्रति धननियुक्तमभिधाय ।
उत्तस्थौ समरभटो मंजरिकां समवलोकयन्प्रेम्णा ॥ ९५९ ॥

गत्वाथ स्वावसथं निर्वर्तितभोजनादिकर्तव्यः ।
मंजरिकाकृष्टमना अभिदध्यौ सचिवसन्निधावेवम् ॥ ९६० ॥

भ्रूभंगस्मितवीक्षितमृदुवक्रवचोंऽगहारगमनेषु ।
कुसुमप्रहरण एको युगपद्विहिताश्रयः कथं तस्याः ॥ ९६१ ॥

सुन्दोपसुन्दनाशः फलमात्मभुवस्तिलोत्तमासृष्टेः ।
जनमृतये तां सृजता किं दृष्टं सुरहितं तेन ॥ ९६२ ॥

सुमनोभिः परिकरिता मृगशावकतरलचक्षुषस्तस्याः ।
कामोचितफलहेतुर्देहभृतां दीर्घिका वेणी ॥ ८६३ ॥
कमलमिव वदनकमलं पिबंति तस्यास्त्रिविष्टपभ्रष्टाः ।
मदलिकमपेतदोषं सविभ्रमं मधुमदातामम् ॥ ८६४ ॥
यः शैलेन्द्रनितम्बं सुरताप्त्यै सेवते तपोनिरतः ।
स्पृहयति सोऽपि नितम्बं सुरताप्त्यै समवलोक्य तन्वंग्याः ॥ ८६५ ॥
त्रिकरो मध्यविभागो बाह्वोर्युगलं करद्वयोपेतम् ।
जनयति तदपि मृगाक्षी सहस्रकरतोऽधिकं तापम् ॥ ८६६ ॥
सा स्रग्धरा सुवदना प्रहर्षिणी सैव सैव तनुमध्या ।
न करोति कस्य विस्मयमिति रुचिरा मंजुभाषिणी सैव ॥ ८६७ ॥
अनुकुर्वत्या कन्यां तथा तथा नायकस्तया दृष्टः ।
येन जरत्खण्डनो धनुषः स्पृष्टा दशार्धबाणेन ॥ ८६८ ॥
रूपं यौवनचिचितमनंगविकृतानि नाट्यदीप्तानि ।
शमिनामपि शमगर्वं मुष्णन्त्यविकल्पितं तस्याः ॥ ८६९ ॥
दग्धेऽपि वपुषि भीतिं न विमुंचति नीललोहितसमुत्थाम् ।
तत्क्षेत्रे वसति यतः प्रमदारूपेण शंबरध्वंसी ॥ ८७० ॥
यदि वः परलोकमतिः शृणुत श्रेयस्तपोधना मत्तः ।
उत्सृज्य यात तूर्णं वारवधूदूषितं स्थानम् ॥ ८७१ ।
चिरमपि विकल्प्य निश्चितिरियमेव स्थाप्यते न गतिरन्या ।
तन्निर्माणे जाता लावण्यमयाः कणा विधेरणवः ॥ ८७२ ॥
आमाद्य समुच्छ्रायं तस्याः स्तनयुगलमतिविहतप्रसरम् ।
चपयति यज्जनमेवं कः स्पृह्यति तद्विवेकवान्पतितम् ॥ ८७३ ॥

स कथं न स्पृहणीयो विषयरतैस्तन्वितम्बविन्यासः ।
शान्तात्मनापि विहितं विश्वसृजा गौरवं यस्य ॥ ९७४ ॥
स्मरणाद्यस्योत्पत्तिः सुमनस इषवोऽबलाश्रया शक्तिः ।
सोऽपि व्यंगः प्रहरति धातुरहो चित्रमाचरितम् ॥ ९७५ ॥
तिष्ठन्त्वन्ये दृष्ट्वा सारं जगतस्तदंगनारत्नम् ।
नष्टपठनावधानो भवति ब्रह्मा सनिर्वेदः ॥ ९७६ ॥
यदि पश्यति तां शर्वस्तदपररामासमागमाद्विमुखः ।
निन्दति मूर्धनि सोमं स्मराग्निसंधुक्षणं शरीरं च ॥ ९७७ ॥
केशव इह संनिहितः सापि मनोहारिरूपसम्पन्ना ।
तदहस्त्रिभुवनभुवं कथमुज्झति सैंधवी शंकाम् ॥ ९७८ ॥
उदयति न पंडितानां कथमात्मनि कौतुकं गजेन्द्रगतिः ।
यन्नववयसां पुंसां विना क्रियायोगमुपसर्गः ॥ ९७९ ॥
श्रुतिकुवलयमीक्षणतां कुवलयतां वा विलोचनं यायात् ।
हरिणदृशो यदि न स्यात्कनकोज्ज्वलकेसरं मध्ये ॥ ९८० ॥
ललनास्तदतुल्यतया पुरुषा अपि तदुपभोगविरहेण ।
गच्छन्ति शोषमनिशं प्रकृतिद्वयवर्जिताः स्वस्थाः ॥ ९८१ ॥
दुर्वृत्तयोर्न वृत्तं श्लाघास्पदमेति तत्पयोधरयोः ।
यौ धृतामलमूर्तिं मध्ये हारं जनक्षयं कुरुतः ॥ ९८२ ॥
भूमण्डलेऽत्र सकले नातः परमपरमद्भुतं किंचित् ।
नो जाता यदुपार्था कृशोदरी धार्तराष्ट्रयातापि ॥ ९८३ ॥
कृश एष मध्यदेशस्तन्व्या नाहार्यमण्डनं वोढुम् ।
शक्त इति कृतं विधिना रोमावलिभूषणं सहजम् ॥ ९८४ ॥

साकंपोऽधर ईचणयुगलस्याधीरता भ्रुवोर्भंगः ।
तन्वंग्या बलमीदृग्जयति जगत्तदपि निःशेषम् ॥ ९८५ ॥
वहतु नितम्बः स्थूलो रशनां हारं च कुचयुगं पीनम् ।
तद्वाक्कमृणालिकयोः सापायं कटकयोजनमयुक्तम् ॥ ९८६ ॥
बहूपायाभिज्ञा गुणविषये सततमाहितप्रीतिः ।
बलिनः स्थापयति वशे करभोरुर्विग्रहेण मृदुनैव ॥ ९८७ ॥
इति तत्स्तुतिमुखरमुखे राजसुते मीनकेतुनाकुलिते ।
समुपागता प्रगल्भा मंजरिकाचोदिता दूती ॥ ९८८ ॥
सा सप्रणतिः पुरतः सुमनस्ताम्बूलपटलकं निदधे ।
व्यज्ञापयच्च तदनु स्वावसरे सहचरीकार्यम् ॥ ९८९ ॥
मुररिपुनाभिसरोरुहमवतंसीकर्तुमीहते मूढा ।
नचत्रराजमण्डलमिच्छति वियतः समादातुम् ॥ ९९० ॥
निश्चेतनाभिकांचति पीयूषं त्रिदिवसद्मनामशनम् ।
अभिलषति शयनमुष्णे नवचन्दनपल्लवास्तरणे ॥ ९९१ ॥
विदधाति पारिजातकसुमनोनिर्व्यूहधारणश्रद्धाम् ।
दुर्व्यवसिता जिहचति नारायणवचसो रत्नम् ॥ ९९२ ॥
अनियतपुरुषस्पृश्याः पापा वयमन्यथा क हीनकुलाः ।
क च यूयमिन्द्रकल्पा अनल्पमनसो गुणाभरणाः ॥ ९९३ ॥
दुष्प्रकृतेः प्रकृतिरियं तस्य तु दग्धात्मजन्मनः कापि ।
अगणितयुक्तायुक्तो लगयति चेतो यदस्थाने ॥ ९९४ ॥
या रमति सरोजवतीं रमान्विता सहजरागरक्तेति ।
ध्यानधिय आत्मवृत्तिं निन्दत्येकच पुरुष आसक्ताम् ॥ ९९५ ॥

श्लिष्येति नाभिनन्दति जन्मशतेनापि सर्पिषो धाराम्।
पंचाच्युतगतिं नानर्थकरमणसंगतां स्तौति ॥ ९९६ ॥
न स्तौति चन्दनलतां भुजंगपरिवेष्टितां रसार्द्रेति।
न शृणोति कीर्त्यमानां स्वप्नेष्वपि मदनमूर्च्छितां सतीम् ॥ ९९७ ॥
विद्वेष्टि करणमध्ये रसनां ताम्बूलरागरक्तेति।
शंसति मतिं मुमुक्षोरविशिष्टां शशवृषाश्वपुरुषेषु ॥ ९९८ ॥
नो बहु मनुते रम्भां नलकूबरमभिसृतेति कामार्ता।
गर्हति च देवगणिकामनुरक्तामुर्वशीं पुरूरवसि ॥ ९९९ ॥
हरति मनो नो ह्रियते रंजयति न रज्यते कदाचिदपि।
गृह्णाति चित्रचरितैरुपकृतिभिर्गृह्यते न वक्रोभिः ॥ १००० ॥
प्रेममयीवाभाति प्रेम तु नाम्नैव केवलं वेत्ति।
कंटकिता भवति रते रतभोगसुखं शृणोति लोकात्तु ॥ १००१ ॥
कुरुते विविक्तचाटून् शिल्पविशेषेण न तु रसावेशात्।
अनभिज्ञा मदनरुजामाकल्पकवेदनां समावहति ॥ १००२ ॥
बालेवार्जवरहिता स्फुरतीश्वरमेत्य चन्द्रलेखेव।
हृतधनपतिमाहात्म्या प्रवृत्तिरिव रक्षसां पत्युः ॥ १००३ ॥
नरनाथ किं ब्रवीमि त्रिपुरान्तकनयनदाहदग्धोऽपि।
दुःसाध्यसाधनग्रहमुत्सृजति न पापकुसुमास्त्रः ॥ १००४ ॥
त्वद्दर्शनावकाशं संप्राप्य यतो दुरात्मना तेन।
चिरसम्भृतकोपेन प्रारब्धा सापि हन्तुमिषुधारैः ॥ १००५ ॥
(कुलकम्)

अवहेलयैव भवता संस्पृष्टा येन वेत्रदण्डेन।
जातः स एव तस्या अनन्यभवमार्गणः प्रथमः ॥ १००६ ॥

विज्ञानार्जितदर्पो निभृतं हसितः समानशिल्पाभिः ।
त्वयि सक्तदृशः सख्या विसंष्ठुले नाट्यनिर्माणे ॥१००७॥
अवधीर्याचार्यवृषं भरतोदितदोषकरणसम्भूताम् ।
विस्तारितः प्रयोगस्त्वदवस्थितिवाञ्छया तन्व्या ॥१००८॥
भग्नेऽपि प्रेक्षणके तदन्तरभूमिकाश्रयावस्थाः ।
गूढ एव निरवसानं वितनोति न नाट्यधर्मेण ॥१००९॥
ध्यायन्त एकं पुरुषं परमात्मविदः प्रशंस या न पुरा ।
ताननुकुरुते सैव ध्यायन्ती त्वां महापुरुषम् ॥१०१०॥
गतमेवमेवमाषितमालोकितमेवमेवमालपितम् ।
इति विस्मृतान्यकार्या स्मरति कृशाङ्गी त्वदीयलीलानाम् ॥१०११॥
नलकूवरो वराको रतिरमणे रमण एव किं तेन ।
अनिरुद्धोऽपि न बुद्धो विदग्धविहितासु सुरतगोष्ठीषु ॥१०१२॥
न जयन्तोऽनन्तगुणो न कुमारो मारकर्मणोऽवाह्यः ।
येन समतां नयामस्त्वमिति सखी वहति मानसं क्लिष्टम् ॥१०१३॥
आगतमागच्छन्तं पुरतः पार्श्वे प्रसन्नमथ कुपितम् ।
पश्यति भवन्तमेकं सङ्कल्पनिवेशितं बाला ॥ १०१४ ॥
हृद्यः शान्तो हृद्यः सुभगः सुखदो मनोहरो रमणः ।
इष्टः स्वामी दयितः प्राणेशः केलिकरणनिपुण इति ॥१०१५॥
मुक्तान्यसमारम्भा वरतनुरनुपप्लुतेन चित्तेन ।
जपति समीहितसिद्ध्यै त्वद्द्वादशनामकं महास्तोत्रम् ॥१०१६॥
तामेव गच्छ यस्यामासज्य विलम्बितोऽसि गतलज्ज ।
वेलामियतीमलमलमेतैरधुना शठानुनयैः ॥ १०१७ ॥

वक्ष्यामि सापराधं क्रोधस्फुरदधरमञ्चितभ्रूकम्।
इति विदधाति सुमध्या हृदयेन मनोरथावृत्तिम्॥ १०१८॥
(मन्दानितकम्)

उत्सहते न द्रष्टुं प्रतिबिम्बितमाननं कुतः शशिनम्।
का संकथा मृणाले क्षिपति भुजौ सर्वतो व्यथिता॥ १०१९॥

दूरे कदलीदण्डा ऊर्वोरपि न सहते समाश्लेषम्।
करसम्पर्कादिमुखी विश्राम्यति पल्लवेष्विति विरुद्धम्॥ १०२०॥

अयि मञ्जरि सैव त्वं विदग्धजनमण्डिता पुरी सैव।
कुसुमायुधः स एव व्यसनं कुत एतदायातम्॥ १०२१॥

यस्याः कामः कृपणो रागाकृष्टिस्तृणोपलप्रख्या।
सापि गता भूमिमिमां जीवन्त्या नेक्ष्यते किमिह॥ १०२२॥

अभियोगशिक्षितानामशिक्षितानां च मदनचेष्टानाम्।
सुतनु विशेषग्रहणे सामर्थ्यं तद्विदामेव॥ १०२३॥

व्यथयन्नपि सच्छायः परिजनचिन्ताकरोऽपि रमणीयः।
आधत्ते त्वयि लक्ष्मीमभिनवरागाश्रयो रागः॥ १०२४॥

एकः स एव जातो भुवनेऽस्मिन्नसमसायकस्पर्धी।
तेन शशिबिम्बफलके स्वजन्मना लेखितं निजं नाम॥ १०२५॥

पादस्तेन सलीलं विन्यस्तः सुभगमानिनां मूर्ध्नि।
सौभाग्ययशःकुसुमं धनपतिसूनोः कदर्थितं तेन॥ १०२६॥

नरवञ्चनपटुबुद्धिः सम्पादितकपटचाटुसङ्घटना।
त्वमपि विलासिनि नीता गतिमियतीं येन सुभगेन॥ १०२७॥
(अन्तर्विशेषकम्)

तद्वद् तस्य स्थानं यतामहे कार्यसाधनायाशु ।
कुर्वत एव हि यत्नं भिषग्जनाः कृच्छ्रसाध्यरोगेऽपि ॥ १०२८ ॥
इति गदिते सख्या सा तदभिमुखं चक्षुषी समुन्मील्य ।
वितरति कृच्छ्रेण चिराद्भावितमक्लिष्टहुंकारम् ॥ १०२९ ॥
का पुरुषार्थसमीहा द्योतयतः शर्वरीं शशाङ्कस्य ।
तर्पयतां भुवमखिलां सलिलमुचां कोऽभिकाङ्क्षितो लाभः ॥१०३०॥
मण्डयितुं वियदुदयति पुरुहूतधनुर्विनैव फलवाञ्छाम् ।
अनपेक्षितात्मकार्यः परहितकरणग्रहः सतां सहजः ॥ १०३१ ॥
प्रायेण यन्निदानं तत्सेवनमुपशमाय रोगाणाम् ।
स्मरमान्द्यं तु यदुत्थं तदेव खलु भेषजं यतस्तस्य ॥ १०३२ ॥
तेन स्पृहयति सुतनुस्त्वत्पादयुगाङ्करेणुसङ्गतये ।
आशीर्विषयोपेते सम्भोगसुखोदये तु नाकाङ्क्षा ॥ १०३३ ॥
(सन्दानितकम)

प्रमदमुपैति मयूरी परमं शब्देन वारिवाहस्य ।
अनिमिषविलोकितेन प्राप्नोति झषी कृतार्थतामेव ॥ १०३४ ॥
न वृथास्तुतिमुखरतया न च युष्मल्लोभनाभियोगेन ।
विदधामि तद्गुणाख्यां स्वरूपमात्रप्रसङ्गेन ॥ १०३५ ॥
सद्भावबद्धमूले स्मितदृष्टिभ्रूविकारपल्लविते ।
सेवन्ते हृदयरसां रागतरौ मञ्जरीं धन्याः ॥ १०३६ ॥
तिष्ठतु तदंगसङ्गो विलोकिता येन झगिति वरगात्री ।
तस्यान्यो युवतिजनः प्रतिभाति मनुष्यरूपेण ॥ १०३७ ॥
सकृदपि यैरनुभूतस्तत्तनुपरिरम्भसुखरसास्वादः ।
विद्धि नराधिप तेषां दूरीभूतं प्रजाकार्यम् ॥ १०३८ ॥

आस्था का खलु तस्या विषयग्रहदुर्बलेषु पुरुषेषु।
यस्या विलासजालकपतितः शकुनायते कपिलः॥१०३९॥

दग्ध्वा पुनरपि दग्धो नूनमनङ्गो हरेण तां तन्वीम्।
दृष्ट्वापि येन तिष्ठसि निराकुलः स्वस्थवृत्तेन॥१०४०॥

अथ विरतोक्तौ तस्यामुल्लासितमानसे च नृपतौ च।
कश्चिदगायद्गीतिं स्मृतिमङ्गतिमागतां प्रसङ्गेन॥१०४१॥

'अन्योन्यगाढरागप्रवलीकृतचित्तजन्मनोर्यूनोः।
कालात्ययो मनागपि समागमानन्दविघ्नकरः'॥१०४२॥

श्रुत्वा सिंहभटसुतः प्रियाप्रियां गीतिमान्स्मितप्रथमम्।
निजगाद चारुभाषिणि गीतिकया समयसम्मतं कथितम्॥१०४३॥

अभिनन्द्य सा तथेति प्रययौ प्रमदावती निजं भवनम्।
अकरोच्च विदितकार्यां युक्तेऽवसरे मनोरमां गणिकाम्॥१०४४॥

अथ सा कृतसङ्कल्पा सत्वरमादाय रुचिरविच्छित्तिम्।
आसाद्य नृपनिशान्तं विवेश सञ्चारिकासहिता॥१०४५॥

विहितनमस्कृतिरासनमधितष्ठौ नायकेन निर्दिष्टम्।
पृष्टे च देहकुशले विनयान्वितमभ्यधाद्दूती॥१०४६॥

श्रीमत्यद्य श्रेयः सम्पन्ना गुरुजनाशिषोऽशेषाः।
अद्य मदनः प्रसन्नो भाग्यचयैरद्य परिणतं फलतः॥१०४७॥

अद्य जननी प्रसूता सौभाग्यगुणोदयोऽद्य निष्णातः।
त्वयि वितरति सस्नेहं निरामयप्रश्नभारतीं तस्याः॥१०४८॥

(सन्दानितकम्)

उत्कलिकाकुलमनसामुद्रिक्तरिरंसयाभिभूतानाम्।
औदासीन्यं भजतां समा यतो भवति नालिका यूनाम्॥१०४९॥

धृतसुमनःशरधनुषा सहायवांस्तिष्ठ दयितया सार्धम् ।
यामो वयं न राजति विजनस्थितिमिथुनसन्निधावपरः ॥१०५०॥

एषा नृत्यश्रान्ता मदनेनायासितातिसुकुमारा ।
त्वमपि रतिसमरशूरः स्वर्गभुवः सन्तु कुशलाय ॥ १०५१ ॥

यावद्यावदशक्तिं प्रथयति ललना हि मोहनाक्रान्ता ।
तावत्तावत्पुंसामुत्साहः पल्लवान्समुत्सृजति ॥ १०५२ ॥

इति शून्यीकृतवेश्मनि हरति शनैः सहजमंशुकं तस्मिन् ।
दर्शितसाध्वसलज्जा जगाद सा किं करोषीति ॥ १०५३ ॥

अयि मुग्धे तत्क्रियते पुरुषार्थचतुष्टयस्य यत्सारम् ।
इति निगदितसस्मेरः स्मरविधुरित आततान रतिकलहम् ॥
१०५४ ॥

नानासुरतविशेषैराराध्य चकार भुक्तसर्वस्वम् ।
गणिकासौ राजसुतं त्वगस्थिशेषं मुमोच नातिचिरात् ॥ १०५५ ॥

तद्यन्मयोपदिष्टं कामिजनार्थाप्तिकारणं तेन ।
महतीं समृद्धिमेष्यसि कामुकलोकाहृतेन वित्तेन ॥ १०५६ ॥

इत्युपदेशश्रवणप्रबोधतुष्टा जगाम धाम स्वम् ।
मालत्यपगतमोहा विकरालापादवन्दनं कृत्वा ॥ १०५७ ॥

काव्यमिदं यः शृणुते सम्यक्काव्यार्थपालनेनासौ ।
नो वञ्च्यते कदाचिद्विटवेश्याधूर्तकुट्टनीभिरिति ॥ १०५८ ॥

कुट्टनीमतं काव्यं समाप्तम्[1] ॥

---

[1] This colophon occurs also after verse 1054 in the Society's MS. after which occurs the line कृतिरियं भट्टदामोदरगुप्तस्य महाकवेरिति । This is followed by the rest of the text as printed here in a later Newari hand.—*Ed.*